॥ अथ सप्तशती प्रारभ्यते ॥
रेशमी १२ आणे.
कागदी ९ आणे.

सप्तशतीविषयानुक्रमः ॥

॥ अनुक्रमणिका समाप्ता ॥

|| ॐ श्रीमहालक्ष्म्यै नमः ||

|| सप्तशतीविधिः ||

श्रीगणेशाय नमः || नमो जगदंबायै || अथ साधकः कृतमंगलस्नानतिलकनित्यविधिः प्राङ्मुख आदावाचामेत् || यथा ॐ ऐं आत्मतत्त्वं शोधयामि नमः स्वाहा || ॐ ह्रीं विद्यातत्त्वं शोधयामि नमः स्वाहा || ॐ क्लीं शिवतत्त्वं शोधयामि नमः स्वाहा || ॐ ऐं ह्रीं क्लीं सर्वतत्त्वं शोधयामि नमः स्वाहा || ततः पवित्रपाणिः प्राणायामं कुर्यात् || यथा मूलमंत्रेणेडया (वामनासया) वायुमापूर्य कुंभके चतुर्वारं मूलं पठित्वा द्विवारं मूलमुच्चरन् पिंगलया (दक्षनासया)

रेचयेत् इति ॥ ततः श्रीगणेशगुर्वादीन्नत्वा सुमुखश्चेत्यादि देशकालसंकीर्तनान्ते ॥ नित्यपाठसंकल्पः ॥ अस्माकं सर्वेषां सकुटुंबानां क्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थं समस्तमंगलावाप्त्यर्थं अमुकगोत्रोत्पन्नस्यामुकनाम्नो मम श्रीजगदंबाप्रसादेन सर्वापन्निवृत्तिसर्वाभीष्टफलावाप्तिधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वारा श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थं कवचार्गलाकीलकपठनैकादशन्यासपूर्वकनवार्णमंत्राष्टोत्तरशतजपरात्रिसूक्तपठनपूर्वकं श्रीदेवीसूक्तपठननवार्णमंत्राष्टोत्तरशतजपरहस्यत्रयपठनांतं श्रीचंडीसप्तशत्याः

पाठं करिष्ये ॥ विशेषकामनायां तत्तदूहः कार्यः ॥ सपल्लवा-
दिशतचंडीचिकीर्षायां देशकालसंकीर्तनांते अमुकगोत्रोत्प-
न्नस्य अमुकनाम्नो ममामुकव्याधिनाशपूर्वकं क्षिप्रारोग्यावाप्ति-
द्वारा श्रीमहाकाली० ३ दुर्गाप्रीत्यर्थं इत्यादि० ॥ अथवा अप
मृत्युंपरिहारंपूर्वकमायुरभिवृद्धिद्वारा० ॥ अथवा अमुकशत्रु-
पराभवपूर्वकं अमुकवशीकरणसिद्धिद्वारा श्रीमहाकाली० ३ ॥
अथवा ग्रहपीडानिवारणपिशाचोपद्रवादिसर्वानिष्टनिवारणपू-
र्वकं क्षेमायुःसकलैश्वर्यसिद्धिद्वारा श्रीजगदंबामहाकालीमहा-
लक्ष्मीमहासरस्वतीरूपिणीत्रिगुणात्मिकामुककुलदेवताप्रीत्यर्थं

कवचार्गलाकीलक० शत्याः प्रतिमंत्रांते शरणागतेत्यादिमंत्र-पल्लवितायाः पाठरीत्या शतपाठात्मकशतचंड्याख्यं० (अथवा प्रतिमंत्रं सर्वमंगलेत्यादिमंत्रसंपुटितायाः ॥ अथवा प्रतिमंत्रादौ सर्वस्वरूपे इत्यादिमंत्रयोजितायाः पाठरीत्या शतचंड्याख्यं० ॥ नवचंडीचिकीर्षायां दशपाठात्मकनवचंड्याख्यमित्यूहे विशेषः ॥) कर्म करिष्ये ॥ इति प्रथमसंकल्पः ॥ ततो नित्यसंकल्पस्तु पूर्वसंकल्पितकामनासिद्ध्ये पूर्वसंकल्पितशतचंडीसंख्यापरिपूर्तये नवचंड्यां नवचंडीसंख्यापरिपूर्तये पूर्वसंकल्पितरीत्या पाठाख्यं कर्म करिष्ये ॥ तदंगत्वेनादौ संक्षेपतः

आसनविधिभूशुद्ध्यादिकर्म दीपस्थापनपूजनं श्रीसप्तशती-पूजनं रहस्योक्तयंत्रस्थप्रधानदेवतापूजनं तंत्रोक्तनवार्णयं-त्रस्थप्रधानदेवतापूजनं वा पायसेन इक्षुखंडकूष्मांडाद्य-न्यतमफलेन वा पूजांगबलिदानं च सकलशापप्रतिबं-धनिवृत्तये तंत्रोक्तशापोद्धारमंत्रस्य सप्तवारजपं इष्टफलसिद्धि-प्रतिबंधनिवृत्तये तंत्रोक्तोत्कीलनमंत्रस्य पाठादौ पाठांते च एकविंशत्येकविंशतिसंख्याजपं च करिष्ये ॥ आदौ निर्वि-घ्नतासिद्ध्यर्थं महागणपतिस्मरणं सद्गुरुपादुकास्मरणं च क-रिष्ये । गणानां त्वा शौनको गृत्समदो गणपतिर्जगती निर्विघ्न-

तासिद्ध्यर्थे महागणपतिस्मरणे विनियोगः ॥ ॐ गुणानां त्वा गुणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजं ब्रह्म- णां ब्रह्मणस्पत आ नं शृण्वन्नूतिभिः सीद सादनं ॥ सिद्धिबु- द्धिशक्तिसहितमहागणपतये नमो नमः इति ॥ ततः नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः ॥ आचार्यसिद्धेश्वरपादुकाभ्यो नमोस्तु लक्ष्मीपतिपादुकाभ्यः ॥ श्रीगुरुभ्यो नमो नमः ॥ इति श्रीगणपतिं सद्गुरुं च नत्वा ॥ अथासनविधिः ॥ स यथा ॥ आसनाधो जलादिना त्रिकोणं विलिख्य ॐ ह्रीं आधारशक्तिकमलासनाय नमः इत्याधा-

रशक्तिं संपूज्य तदुपर्यनुद्विघ्नताकरं कुशकंबलाद्यन्यतममा-सनमास्तीर्य ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः ॥ कूर्मो देवता ॥ सुतलं छंदः ॥ आसने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं ॥ इत्याधारशक्तिं संप्रार्थ्य ॥ ॐ भूर्भुवःस्वः इत्या-सनं संप्रोक्ष्य तदुपरि प्राङ्मुख उदङ्मुखो वा उपविश्य ॐ अनंतासनाय नमः ॐ कूर्मासनाय नमः ॐ विमलासनाय नमः ॐ पद्मासनाय नमः ॐ योगासनाय नमः ॐ आधा-रशक्त्यै नमः ॐ दुष्टविद्रावणनृसिंहासनाय नमः ॐ मध्ये

परमसुखासनाय नमः इति नत्वा ॥ ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षणे ॥ तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते ॥ इति शिखामाबद्ध्य ॥ ॥ अथ बाह्यभूतशुद्धिः ॥ ॐ अपसर्पंतु ते भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ ॐ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं ॥ सर्वेषामवरोधेन जपकर्म समारभे ॥ इति भूतान्युत्सार्य ॥ तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ इति भैरवाज्ञां गृहीत्वा ॥ अथ स्थलशुद्धिः ॥ देवतामंडपं चतुर्द्वारं विचिन्त्य

ॐ अंतरितᳲरक्षोंऽतरिता अरातयः हुं फट् इति मंडपांतः अक्षतान् क्षिप्त्वा ॥ वामतो गुं गुरुभ्यो नमः ॥ दक्षिणतो भं भद्रकाल्यै नमः ॥ उपरिष्टात् गं गणपतये नमः ॥ इति द्वारदेवताः संपूज्य ॥ १ ॥ अथ विघ्नोत्सारणं आत्मरक्षणं च यथा ॥ मूलं पठन्दिव्यदृष्ट्यवलोकनेन दिव्यान् विघ्नानुत्सारयामि ॐ फडिति प्रोक्षणेनांतरिक्षान्विघ्नानुत्सारयामि ॐ फडिति वामपादपार्ष्णिघातेन भौमान् विघ्नानुत्सारयामि ॐ अस्त्राय फट् इति तालत्रयेण दिग्बंधनं कृत्वा ॐ नमः सुदर्शनाय अस्त्राय फट् इति मंत्रेण छोटिकया वह्निप्राकारत्रयं विभाव्य

भूशुद्ध्यादीनि कुर्यात् ॥ ॥ भूशुद्धिः ॥ गायत्र्या प्राणानायम्य हुं इति बीजेन कुंडलिनीमुत्थाप्य हृदिस्थं दीपकलिकाकारं जीवं ॐ हंसः इति मंत्रेण ब्रह्मणि संयोज्य स्वदक्षिणकुक्षिस्थं पापपुरुषं ध्यात्वा यं इति १६ षोडशवारोच्चारितवायुबीजेन पिंगलया पूरकेण तं पापपुरुषं शोषयित्वा कुंभके रं इति ६४ चतुःषष्टिवारोच्चारितवह्निबीजेन तं दग्ध्वा पुनः यं इति ३२ द्वात्रिंशद्वारोच्चारितवायुबीजेन तद्भस्म इडया रेचयेत् ॥ ब्रह्मरंध्रगते चंद्रमंडलेऽमृतवर्षिणीं ॥ भवानीं भूमिशुद्ध्यर्थं भावयेदमृतेश्वरीं ॥ ततस्तन्मौलिनिष्पंदसुधाकल्लोलवृष्टिभिः ॥

चिंतयेन्मनसात्मानं भूमिशुद्धिरियं भवेत् ॥ इति संक्षेपतो भूशुद्धिः ॥ ॥ अथ भूतशुद्धिः ॥ इडया वायुमापूर्य कुंभके लंवंरंयंहं इति पंचभूतबीजानि सकृदावर्त्य पिंगलया रेचयेत् ॥ ततो वमित्यमृतबीजेन प्राणायामं कृत्वा सद्वासनात्मकं देवी-शरीरमुत्पाद्य सोहं इति मंत्रेण कुंडलिनीं ब्रह्मणोवहृत्य तत्रस्थं जीवं हृदि निधाय कुंडलिनीं मूलाधारगतां विभावयेदिति संक्षे-पतो भूतशुद्धिः ॥ ॥ अथ प्राणप्रतिष्ठा ॥ हृदि हस्तं दत्वा ॐ आं ह्रीं क्रों मम प्राणा इह प्राणाः ॐ आं ह्रीं क्रों मम जीव इह स्थितः ॐ आं ह्रीं क्रों मम सर्वेंद्रियाणि ॐ आं ह्रीं क्रों

मम वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थानि सर्वेंद्रियाणि स्वस्थाने इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ ॐ असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं ॥ ज्योक्पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति ॥ मम गर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थं पंचदशप्रणवावृत्तीः करिष्ये ॥ ॐ १५ ॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान् ॥ बिभ्राणाऽसृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ सुप्रतिष्ठितम-

स्त्विति संक्षेपेण प्राणप्रतिष्ठा ॥ ॥ अथ मातृकान्यासो यथा ॥ अंजलिं बद्ध्वा अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः कंखंगंघंङं-चंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंळंक्षं इति मातृकाबीजान्यंजलिगतानि विभाव्य मूर्धादिपादांतं त्रिर्न्य-सेदिति संक्षेपः ॥ ततो मूलेनाचम्य ॥ प्राणानायम्य ॥ दीपस्था-पनं ॥ घृतदीपो भवेद्दक्षे तैलदीपस्तु वामतः ॥ सितवार्तियुतो दक्षे रक्तवर्तिस्तु वामतः ॥ देव्या इति शेषः ॥ तत्स्थापनप्रकारः ॥ देवीपीठदक्षिणतो भूमौ गंधेन त्रिकोणं विलिख्य दीपाधार-यंत्राय नमः इति गंधपुष्पाक्षतैः समर्च्य ॥ तत्र घृतपूर्णं शुक्लव-

र्तियुतं दीपपात्रं संस्थाप्य दीपं प्रज्वाल्य नाम्ना पंचोपचारैः संपूज्य ॥ भो दीप देवीरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् ॥ यावत्कर्मसमाप्तिः स्यात्तावत्त्वं सुस्थिरो भवेति संप्रार्थ्य ॥ तेनैव प्रकारेण देवीपीठवामभागे प्राग्वत्रिकोणे तैलपूर्णं रक्तवर्तियुतं दीपपात्रं संस्थाप्य दीपं प्रज्वाल्य संपूज्य भो दीपेति प्रार्थयेत् ॥ इत्येवं स्थापितदीपावासमाप्ति रक्षेदिति ॥ ॥ अथ यंत्रे देवतास्थापनं ॥ दीपद्वयमध्यपीठे ताम्राद्यन्यतमपत्रे भूर्जपत्रे वा कुंकुमादिना देव्यष्टगंधेन[1] वा यंत्रं लिखेत् वैकृतिकरहस्योक्तं ॥

---

१ देव्यष्टगंधो यथा—चंदनागुरुकर्पूरं कुंकुमं रोचनं तथा ॥ शिलारसो जटामांसी

महालक्ष्मी ँदा पूज्येत्यादिश्लोकत्रयोक्तं यथा ॥

<table>
<tr><td>ॐ गौर्या सह रुद्राय नमः ५</td><td>ॐ स्वरया सह विरिंचये नमः ४</td><td>ॐ लक्ष्म्या सह हृषीके० नमः ६</td></tr>
<tr><td>ॐ ऐं महाकाल्यै नमः ९</td><td>ॐ ह्रीं महालक्ष्म्यै नमः २</td><td>ॐ क्लीं महासरस्वत्यै नमः ३</td></tr>
<tr><td>ॐ अष्टभुजायै नमः १</td><td>ॐ अष्टादशभुजायै नमः ७</td><td>ॐ दशाननायै नमः ८</td></tr>
</table>

महिषाय नमः १०	सिंहाय नमः ११	कालाय नमः १२	मृत्यवे नमः १३

इति दशावरणदेवताः

कर्पूरं चैकवृद्धितः ॥ एकवृद्धितः चंदनः अंशः १। ततः परस्यैकवृद्धिः नाम अगुरुः अंशौ २। ततः परस्य कर्पूरस्यैकवृद्धिः नाम अंशाः ३। एवमग्रे एकवृद्धिर्ज्ञेया । अन्यत्सुगमम् ।

अथवा तांत्रिकं नवार्णोक्तं यंत्रं यथा ॥

अथ लिखेदष्टदलमित्यादिश्लोकद्वयोक्तं नवार्णयंत्रं । अस्मिन्यंत्रे नावरणानि किंतु मूलमंत्रांते श्रीमहाकालीमहालक्ष्मी-महासरस्वतीस्वरूपिण्यै दुर्गायै नमः इति मंत्रेणावाहनादिसर्वोपचारान् समर्पयेत् ॥

तद्यथा ॥ लिखेदष्टदलं पद्मं चंदनागुरुकुंकुमैः ॥ पद्ममध्ये लिखेच्चक्रं षट्कोणं चंडिकामयं ॥ १ ॥ षट्कोणचक्रमध्य-

स्थमाद्यबीजत्रयं लिखेत् ॥ पूर्वादिकोणषट्के तु बीजान्य-
न्यानि विन्यसेत् ॥ तंत्रोक्तं सप्तशतीमहायंत्रं ॥ २ ॥ वेद्यां
विरचिते रम्ये सर्वतोभद्रमंडले ॥ घटं संस्थाप्य विधिवत्त-
त्रावाह्यार्चयेच्छिवां ॥ ३ ॥ तदग्रे कन्यकाश्चापि पूजयेद्ब्रा-
ह्मणानपि ॥ उपचारैस्तु विविधैर्नवार्णावरणैरपीति ॥ ४ ॥
अथ प्रयोगः ॥ वेद्यां सर्वतोभद्रे ब्रह्मादिमंडलदेवता आवाह्य
संपूज्य तस्मिन्महीद्यौरित्यादिमंत्रैः कलशं संस्थाप्य तत्र वरुणं
संपूज्य तन्मूले मूलाधाराय नमः मूलाधारमावाहयामि १
इति सर्वत्र तदुपरि कूर्माय नमः २ तदुपरि शेषाय० ३

तदुपरि पृथिव्यै नमः ४ पूर्णपात्रे ॐकारपीठाय० ५ पूर्वे ॥ पूर्णगिरिपीठाय० निर्ऋतिभागे ॥ कामगिरिपीठाय नमः ॥ वायुभागे आवाह्य संपूज्य उपरि यंत्रं संस्थाप्य प्राणप्रतिष्ठां कुर्यात् ॥ ॥ संक्षेपतः पूजाविधिः ॥ अस्य श्रीनवार्णमंत्रस्य ब्रह्म-विष्णुमहेश्वरा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ श्रीम-हाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ नंदाशाकंभरीभी-माः शक्तयः ॥ रक्तदंतिकादुर्गाभ्रामर्यो बीजानि ॥ अग्निवा-युसूर्यास्तत्त्वानि ॥ श्रीजगदंबाप्रीत्यर्थे न्यासे पूजायां च विनियोगः ॥ ऋष्यादिन्यासान् मूलषडंगन्यासांश्च विधाय

कलशशंखघंटाः संपूज्य ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरं शुचिः ॥ इति मूलेनात्मानं पूजाद्रव्याणि च प्रोक्षेत् ॥ (विस्तरभयादर्घ्य-स्थापनं नेह लिख्यते ॥) यंत्रं संस्पृश्य ॐ आं सोहं इति त्रि-वारोच्चारितमंत्रेण यंत्रस्य प्राणप्रतिष्ठां कृत्वा ततः त्रिखंडामु-द्रया पुष्पमादाय स्वहृदिस्थां त्रिगुणां देवीं सुषुम्णामार्गेण ब्रह्मरंध्रद्वारा कुसुमे समागतां विभाव्य तत्र रूपत्रयं बिभ्राणां ध्यायेत् ॥ खड्गं चक्र १ अक्षस्रक्प० २ घंटाशूल० ३ इति तत्पुष्पं यंत्रे संस्थाप्य तत्र मध्यबीजत्रये महालक्ष्म्यादिदेव-

तात्रयं संस्थितं विभावयेत् ॥ अथ मुद्राः ततः आवाहनी, स्थापनी, संनिधापिनी, संनिरोधिनी, धेनु, योनिमुद्रा, मूलेन प्रदर्श्य मूलमुच्चार्य श्रीमहाकालीमहाल० नमः आवाहयामि ॥ एवं मूलेनासनपाद्यार्घ्याचमनीयस्नानमंगलस्नानमधुपर्कपंचामृतपूजां विधाय श्रीसूक्तादिभिरभिषिच्य मूलेन वस्त्रोपवस्त्रोत्तरीयकंचुकीवस्त्रयज्ञोपवीतचंदनालंकारहरिद्राकुंकुमकज्जलसिंदूरपरिमलद्रव्यकंकणकंठसूत्रादिसौभाग्यालंकारपुष्पाणि ॥ मूलं श्रीमहा० २ नमः अमुकं समर्पयामीति प्रत्युपचारमुच्चार्य पुष्पांतपूजायां आवरणदेवता आवाह्य संपूजयेत् ॥ ॥ अथा-

वरणदेवताः ॥ अत्र सर्वत्र ॥ पूज्यपूजकयोर्मध्ये प्राचीदिक्सं-
प्रकीर्तिता ॥ इतिवचनमनुस्मृत्य प्रागादिदिशो ग्राह्याः ॥ इंद्रा-
दिलोकपालतदायुधविषये तु सूर्योदयिकैवेति ज्ञेयं ॥ तत्र यंत्र-
षट्कोणस्थपश्चिमकोणे महालक्ष्मीपृष्ठभागे सरस्वतीब्रह्मभ्यां
नमः ॥ सरस्वतीब्रह्माणावावाहयामीत्येवं सर्वत्रावाहने वाच्यं ॥
१ एवं नैर्ऋत्यकोणे गौरीरुद्राभ्यां० २ वायुकोणे लक्ष्मीहृषी-
केशाभ्यां० ३ पूर्वकोणे अष्टादशभुजायै० ४ अग्निकोणे
दशाननायै० ५ ईशानकोणे अष्टभुजायै० ६ दयाब्धे त्राहि
संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं प्रथमाव-

रणार्चनं ॥ अनेन प्रथमावरणार्चनेन भगवती श्रीमहा० ३ प्रीयतां ॥ १ ॥ पुनः षट्कोणेषु प्रागादिषु ॥ ॐ नं नंदजायै० १ ॐ रं रक्तदंतिकायै० २ ॐ शां शाकंभर्यै० ३ ॐ दुं दुर्गायै० ४ ॐ भीं भीमायै० ५ ॐ भ्रां भ्रामर्यै० ६ दयाब्धे त्राहि० अनेन० ॥ २ ॥ षट्कोणाद्बहिराग्नेयादिचतुर्भागेषु ॐ जं जयायै० १ ॐ विं विजयायै० २ ॐ जं जयंत्यै० ३ ॐ अं अपराजितायै० ४ षट्कोणपार्श्वयोः दक्षिणभागे ॐ सिंहाय० ५ उत्तरभागे ॐ महिषाय० ६ दयाब्धे० तृतीयावरणार्चनं अनेन० ॥ ३ ॥ अत्र पत्रेषु प्रागादिषु ॐ ब्रां ब्राह्म्यै० १ ॐ

मां माहेश्वर्यै० २ ॐकौं कौमार्यै० ३ ॐवैं वैष्णव्यै० ४ ॐ वां वाराह्यै० ५ ॐ नां नारसिंह्यै० ६ ॐ ऐं ऐंद्र्यै० ७ ॐ चां चामुंडायै० ८ दयाब्धे० चतुर्थावरणार्चनं अनेन० ॥४॥ पुनरष्टदलेषु प्रागादिषु ॐअं असितांगभैरवाय० १ ॐरुं रुरुभैरवाय० २ ॐचं चंडभैरवाय० ३ ॐक्रों क्रोधभैरवाय० ४ ॐउं उन्मत्तभैरवाय० ५ ॐकं कपालभै० ६ ॐभीं भीषणभैरवाय० ७ ॐसं संहारभै० ८ दयाब्धे० पंचमावरणार्चनं अनेन० ॥ ५ ॥ चतुर्विंशतिदलेषु प्रागादिक्रमेण ॐ विष्णुमायायै० १ ॐचेतनायै० २ ॥ एवं प्रणवः सर्वत्रादौ ॥ बुद्ध्यै ३ निद्रायै०

४ क्षुधायै० ५ छायायै० ६ शक्त्यै० ७ तृष्णायै० ८ क्षांत्यै० ९ जात्यै० १० लज्जायै० ११ शांत्यै० १२ श्रद्धायै० १३ कांत्यै० १४ लक्ष्म्यै० १५ धृत्यै० १६ वृत्त्यै० १७ स्मृत्यै० १८ दयायै० १९ तुष्ट्यै० २० पुष्ट्यै० २१ मात्रे० २२ भ्रांत्यै० २३ चित्यै० २४ दयाब्धे० षष्ठावरणार्चनं अनेन० ॥ ६ ॥ भूगृहरव्युदयप्रागादिषु ॐ लं इंद्राय० रं अग्नये० मं यमाय० क्षं निर्ऋतये० वं वरुणाय० यं वायवे० सं सोमाय० हं रुद्राय० ईशानीप्रागंतराले ॐ आं ब्रह्मणे० वरुणनिर्ऋत्यंतराले ह्रीं शेषाय० १० दयाब्धे० सप्तमावर-

णार्चनं अनेन ॥ ७ ॥ पुनस्तेनैव क्रमेण वं वज्राय० शं शक्त्यै० दं दंडाय० खं खड्गाय० पां पाशाय० अं अंकुशाय० गं गदायै० त्रिं त्रिशूलाय० पं पद्माय० चं चक्राय १० दयाब्धे० अष्टमावरणार्चनं अनेन० ॥ ८ ॥ भूगृहाद्बहिः प्रागादिदिक्षु ॐ गं गणपतये० क्षें क्षेत्रपालाय० बं बटुकाय० यों योगिनीभ्यो नमः दयाब्धे० नवमावरणार्चनं अनेन० ॥ ९ ॥ ॐ आवरणदेवताभ्यो नमः चंदनं० इत्यादिपंचोपचारपूजा ॥ ततः मूलमुच्चार्य श्रीमहा० ३ धूपं, दीपं, नैवेद्यं, ताम्बूलं, दक्षिणां, फलानि, महानीराजनदीपं, कर्पूरदीपं, नमस्कारान्,

प्रदक्षिणाः, मंत्रपुष्पं० ॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ १ ॥ आवाहनं न जानामि न जानामि विसर्जनं ॥ पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥ २ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥३॥ अपराधशतं कृत्वा जगदंबेति चोच्चरेत् ॥ यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ ४ ॥ सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदंबिके ॥ इदानीमनुकंप्योऽहं यथेच्छसि तथा कुरु ॥ ५ ॥ अज्ञानाद्विस्मृतेर्भ्रांत्या यन्न्यूनमधिकं कृतं ॥

तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ६ ॥ कामेश्वरि जगन्मातः सच्चिदानंदविग्रहे ॥ गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ ७ ॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥ ८ ॥ प्रार्थनां गीतवाद्यनृत्यछत्रचामरांदोलनदर्पणादिसर्वराजोपचारार्थे अक्षतान्० ॥ नमस्करोमि ॥ अनेन यथाशक्त्यर्चनेन भगवती श्रीजगदंबा० ३ प्रीयतां ॥ शाक्तेभ्यो नमः सर्वोपचारार्थे गंधाक्षत० ॥ अथ कुमारीपूजा ॥ यजमानः पूजयेच्च कन्यानां नवकं शुभं ॥ द्विवर्षाद्या दशाब्दांताः कुमारीः परिपूजयेत् ॥ १ ॥ अर्था-

देकहायनाल्पवयस्का वर्ज्याः ॥ ता आसने उपवेश्यावाहयेत् मंत्रेण ॥ मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं ॥ अनेनैव मंत्रेण नवापि आवाहयेत् ॥ अशक्तौ यथाशक्ति एकामपि ॥ अथ नवानां पूजामंत्राः ॥ द्विहायना कुमारीसंज्ञका ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥२॥ त्रिहायना त्रिमूर्तिस्तन्मंत्रः ॥ त्रिपुरां त्रिपुराधारां त्रिवर्षां ज्ञानरूपिणीं ॥ त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहं ॥ ३ ॥ चतुर्वर्षा कल्याणी तत्पूजामंत्रः ॥ कला-

त्मिकां कलातीतां कारुण्यहृदयां शिवां ॥ कल्याणजननीं देवीं कल्याणीं पूजयाम्यहं ॥ ४ ॥ पंचवर्षा रोहिणी तत्पूजामंत्रः ॥ अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ॥ अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥ ५ ॥ षड्वर्षा कालिका तत्पूजामंत्रः ॥ कामचारां शुभां कांतां कालचक्रस्वरूपिणीं ॥ कामदां करुणोदारां कालिकां पूजयाम्यहम् ॥ ६ ॥ सप्तवर्षा चंडिका तत्पूजामंत्रः ॥ चंडवीरां चंडमायां चंडमुंडप्रभंजनीं ॥ पूजयामि सदा देवीं चंडिकां चंडविक्रमां ॥ ७ ॥ अष्टवर्षा शांभवी तत्पूजामंत्रः ॥ सदानंदकरीं शांतां सर्वदेवनमस्कृताम् ॥ सर्व-

भूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहम् ॥ ८ ॥ नवहायना दुर्गा तत्पूजामंत्रः ॥ दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीं ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥ ९ ॥ दशवर्षा सुभद्रा तत्पूजामंत्रः ॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीं ॥ सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ॥१०॥ इति प्रत्येकं मंत्रांते तत्तन्नाममंत्रेण नवापि षोडशोपचारैः पंचोपचारैर्वा पूजयेत् इति ॥ ॥ अथ बलिदानं ॥ मूलांते श्रीमहालक्ष्म्यै नमः पायसबलिं समर्पयामि इति महाकाल्यादियोगिन्यंतयंत्रस्थावरणदेवताभ्यः प्रत्येकं सर्वाभ्यो बलिं

दद्यात् ॥ कूष्मांडबलिविधानं ॥ आचम्य प्राणानायम्य देशाद्युच्चार्य ॥ मम सकुटुंबस्य सर्वारिष्टप्रशांतिसर्वाभीष्टकामसिद्धिकल्पोक्तफलावाप्तिद्वारा श्रीमहाका० ३ तीदेवताप्रीत्यर्थं कूष्मांडबलिदानं करिष्ये ॥ तदंगत्वेन पंचोपचारैः पूजनं बलिपूजनं च करिष्ये ॥ मूलेन मुख्यदेवतां पंचोपचारैः संपूज्य तत्पुरतः स्वयमुदङ्मुखो बलिं प्राङ्मुखं पीठे वस्त्रगुंठितं कूष्मांडं निधाय ॐ कूष्मांडबलये नमः इति आवाहनवस्त्रगंधादिभिः संपूज्य अभिमंत्रयेत् ॥ पशुस्त्वं बलिरूपेण मम भाग्यादवस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणं

॥ १ ॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशनं ॥ चामुंडाबलि-
रूपाय बले तुभ्यं नमोस्तु ते ॥ २ ॥ यज्ञार्थं बलयः सृष्टाः
स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयाम्यद्य यस्माद्यज्ञे मतो
वधः ॥ ३ ॥ इति ॥ ॥ ततः शस्त्रं गंधादिना संपूज्य अभिमं-
त्रयेत् ॥ ऐं ह्रीं श्रीं ॥ रसना त्वं चंडिकायाः सुरलोकप्रसा-
धकः ॥ इति ह्रां ह्रीं खड्ग आं हुं फट् इति हस्ते शस्त्रं गृहीत्वा
ॐ कालि कालि वज्रेश्वरि लोहदंडायै नमः इति पठन् छित्त्वा
छेदनावसरे न विलोकयेत् ॥ कौशिकी रुधिरेणाप्यायतामिति
देव्यै अर्धं निवेद्य अवशिष्टार्धस्य पंचभागान्कृत्वा पूतनायै

बलिभागं निवेदयामि चरक्यै बलि० विदार्यै बलि० पापरा-
क्षस्यै बलि० ॥ ततो माषपिष्टपशुं शत्रुं शस्त्रेण छित्त्वा स्कंदाय
पश्वर्धं समर्पयामि विशिखाय पश्वर्धं स० इति समर्प्य शेषं
रक्षोभ्यो हरेत् २ ॥ मंत्रास्तु ॐ ह्रीं स्फुर स्फुर ॐ फ्रीं ॐ हुं
फट् मर्द मर्द हुं इति ॥ तच्छेषं बहिर्दद्यात् ॥ बलिं गृह्णंत्विमं
देवा आदित्या वसवस्तथा ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः प-
न्नगा ग्रहाः ॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः ॥
डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृंभकाः
सिद्धगंधर्वाः साध्या विद्याधरा नगाः ॥ दिक्पाला लोकपा-

लाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः ॥ भूतानि यानीह वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ अन्यत्र वासं परिकल्पयंतु रक्षंतु मां तानि सदैव चात्रेति ॥ ततः स्नात्वा कृततिलको देवीं प्रार्थयेत् ॥ खड्गिनी शू० ५ शूलेन पा० ४ सर्वस्वरूपे० ५ रूपं देहि जयं देहि भगं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि ॥ आयुरारो-

ण्यमैश्वर्यं देहि देवि नमोस्तु ते ॥ इति प्रार्थयेत् ॥ एतद्ब-
लिदानं होमांगं तच्च होमोत्तरमेव ॥ पूजांगं वैकल्पिकम् ॥
तत्र च पायसबलिदानमवश्यमेव ॥ इति बलिदानविधिः ॥
॥ अथ सरस्वतीपूजनं ॥ ॐनमः पिशाचनिकरंकिनि त्रिशूल-
खड्गहस्ते सिंहारूढे एह्येहि आगच्छ आगच्छ इमां पूजां गृह्ण
गृह्ण स्वाहा । श्रीसप्तशतीसरस्वत्यै नम आवाहयामि । ततःॐ
ह्रीं चंडिकायै नमः इति मंत्रेण षोडशोपचारैः पूजयेदि-
ति ॥ ॥ अथ शापोद्धारमंत्रः ॥ ॐ ह्रीं क्लीं श्रीं क्रां क्रीं
चंडिके देवि शापानुग्रहं कुरु कुरु स्वाहा ७ वारं जपेत् ॥

ततः ॥ ॥ उत्कीलनमंत्रः ॥ ॐश्रीं क्लीं ह्रीं सप्तशति चंडिके उत्कीलनं कुरु कुरु स्वाहा २१ वारं जपेत् ॥

॥ अथ कवचम् ॥

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीकुलदेवतायै नमः ॥ अविघ्नमस्तु ॥ ॐनारायणाय नमः ॥ ॐनराय नरोत्तमाय नमः ॥ ॐसरस्वतीदेव्यै नमः ॥ ॐवेदव्यासाय नमः ॥ ॐनमश्चंडिकायै ॥ ॐमार्कंडेय उवाच ॥ यद्गुह्यं परममित्यादिसार्धपंचाशत् ५० ॥ श्लोकात्मकं कवचं पठित्वा ॐजयंतीत्यादित्रयोविंशति श्लोकात्मकामर्गलां

पठित्वा ॐविशुद्धेत्यादिचतुर्दशश्लोकात्मकं कीलकं पठेत् ॥ अस्य श्रीचंडीकवचस्य ब्रह्मा ऋषिः अनुष्टुप्छंदः चामुंडा देवता अंगन्यासोक्तमातरो बीजं दिग्बंधदेवतास्तत्त्वं श्रीजगदंबाप्रीत्यर्थे सप्तशतीपाठांगजपे विनियोगः ॥

ॐनमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ ॐयद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥ ब्रह्मोवाच ॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ॥ देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ २ ॥ प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी ॥ तृतीयं

चन्द्रघण्टेति कूष्मांडेति चतुर्थकम् ॥ ३ ॥ पंचमं स्कंदमातेति षष्ठं कात्यायनीति च ॥ सप्तमं कालरात्रिश्च महागौरीति चाष्टमम् ॥ ४ ॥ नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ॥ विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥ ६ ॥ न तेषां जायते किंचिदशुभं रणसंकटे ॥ नापदं तस्य पश्यामि शोकदुःखभयं नहि ॥ ७ ॥ यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते ॥ प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥ ८ ॥ ऐन्द्री गजसमा-

रूढा वैष्णवी गरुडासना ॥ माहेश्वरी वृषारूढा कौमारी
शिखिवाहना ॥ ९ ॥ ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ १० ॥ दृश्यन्ते
रथमारूढा देव्यः क्रोधसमाकुलाः ॥ शंखं चक्रं गदां शक्तिं
हलं च मुसलायुधम् ॥ ११ ॥ खेटकं तोमरं चैव परशुं पाश-
मेव च ॥ कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥ १२ ॥
दैत्यानां देहनाशाय भक्तानामभयाय च ॥ धारयन्त्यायुधा-
नीत्थं देवानां च हिताय वै ॥ १३ ॥ महाबले महोत्साहे महा-
भयविनाशिनि ॥ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धि-

नि ॥ १४ ॥ प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥ दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥ १५ ॥ प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥ उदीच्यां रक्ष कौबेरी ईशान्यां शूलधारिणी ॥ १६ ॥ ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥ एवं दश दिशो रक्षेच्चामुण्डा शववाहना ॥ १७ ॥ जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥ अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥ १८ ॥ शिखां मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥ मालाधारी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ॥ १९ ॥ त्रिनेत्रा च भ्रुवोर्मध्ये

यमघण्टा च नासिके ॥ शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वार-
वासिनी ॥ २० ॥ कपोलौ कालिका रक्षेत्कर्णमूले तु शांकरी ॥
नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥ २१ ॥
अधरे चामृतकला जिह्वायां च सरस्वती ॥ दन्तान् रक्षतु
कौमारी कण्ठमध्ये तु चण्डिका ॥ २२ ॥ घण्टिकां चित्रघण्टा
च महामाया च तालुके ॥ कामाक्षी चिबुकं रक्षेद्वाचं मे सर्व-
मंगला ॥ २३ ॥ ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥
नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ॥ २४ ॥ खड्गधा-
रिण्युभौ स्कंधौ बाहू मे वज्रधारिणी ॥ हस्तयोर्दण्डिनी

रक्षेदम्बिका चांगुलीस्तथा ॥ २५ ॥ नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेन्नलेश्वरी ॥ स्तनौ रक्षेन्महालक्ष्मीर्मनश्शोकविनाशिनी ॥ २६ ॥ हृदये ललितादेवी उदरे शूलधारिणी ॥ नाभौ च कामिनी रक्षेद्गुह्यं गुह्येश्वरी तथा ॥ २७ ॥ कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ॥ भूतनाथा च मेढ्रं मे ऊरू महिषवाहिनी ॥ २८ ॥ जंघे महाबला प्रोक्ता सर्वकामप्रदायिनी ॥ गुल्फयोर्नारसिंही च पादौ चामिततैजसी ॥ २९ ॥ पादांगुलीषु श्रीर्मे रक्षेत्पादाधस्तलवासिनी ॥ नखान्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ॥३०॥ रोमकूपेषु कौबेरी त्वचं

वागीश्वरी तथा ॥ रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ ३१ ॥ अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥ ३२ ॥ ज्वालामुखी नखज्वाला अभेद्या सर्वसंधिषु ॥ शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा ॥ ३३ ॥ अहंकारं मनो बुद्धिं रक्षेन्मे धर्मचारिणि ॥ प्राणापानौ तथा व्यानं समानोदानमेव च ॥ ३४ ॥ यशः कीर्तिं च लक्ष्मीं च सदा रक्षतु वैष्णवी ॥ गोत्रमिन्द्राणी मे रक्षेत्पशून्मे रक्ष चण्डिके ॥ ३५ ॥ पुत्रान्रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥ मार्गं क्षेमकरी रक्षेद्विजया सर्वतः स्थिता

॥ ३६ ॥ रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ॥ तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥ ३७ ॥ पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥ कवचेनावृतो नित्यं यत्र यत्राधिगच्छति ॥ ३८ ॥ तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ॥ यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥ ३९ ॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ॥ ४० ॥ त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥ इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥ ४१ ॥ यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धया-

न्वितः ॥ दैवी कला भवेत्तस्य त्रैलोक्येप्यपराजितः ॥ ४२ ॥
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ नश्यन्ति व्याधयः
सर्वे लूताविस्फोटकादयः ॥ ४३ ॥ स्थावरं जंगमं वापि
कृत्रिमं चापि यद्विषम् ॥ आभिचाराणि सर्वाणि मंत्रयंत्राणि
भूतले ॥ ४४ ॥ भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥
सहजाः कुलजा मालाः शाकिनी डाकिनी तथा ॥ ४५ ॥ अन्त-
रिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥ ग्रहभूतपिशाचाश्च
यक्षगन्धर्वराक्षसाः ॥ ४६ ॥ ब्रह्मराक्षसवेतालाः कूष्माण्डा
भैरवादयः ॥ नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते

॥ ४७ ॥ मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरं परम् ॥ यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले ॥ ४८ ॥ जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥ यावद्भूमंडलं धत्ते सशैलवन-काननम् ॥४९॥ तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ ५० ॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥ वाराहपुराणे हरिहरब्रह्म-विरचितं देव्याः कवचम् ॥ १ ॥

॥ अथार्गलास्तोत्रम् ॥ अस्य श्रीअर्गलास्तोत्रमंत्रस्य विष्णुर्ऋषिः अनुष्टुप्छंदः श्रीमहालक्ष्मीर्देवता श्रीजगदंबाप्रीतये सप्तशती-

पाठांगजपे विनियोगः ॥ ॐनमश्चण्डिकायै ॥ जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥ १ ॥ मधुकैटभविद्रावि विधातृवरदे नमः ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २ ॥ महिषासुरनिर्नाशविधात्रि वरदे नमः ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ३ ॥ वन्दितांघ्रि-युगे देवि सर्वसौभाग्यदायिनि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ४ ॥ रक्तबीजवधे देवि चंडमुंडविनाशिनि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ५ ॥

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ६ ॥ नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ७ ॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ८ ॥ चण्डिके सततं ये त्वामर्चयंतीह भक्तितः ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ९ ॥ देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १० ॥ विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥

रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ११ ॥ विधेहि देवि कल्याणं विधेहि परमां श्रियम् ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥ विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥ प्रचण्डदैत्यदर्पघ्नि चण्डिके प्रणताय मे ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १४ ॥ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥ कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १६ ॥ हिमाचलसुताना-

थसंस्तुते परमेश्वरि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७ ॥ सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १८ ॥ इन्द्राणी-पतिसद्भावपूजिते परमेश्वरि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १९ ॥ देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २० ॥ पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २१ ॥ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ॥ तारिणीं दुर्गसंसारसागरस्य कुलोद्भ-

वाम् ॥ २२ ॥ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥ स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ॥ २३ ॥ मार्कण्डेय-पुराणे अर्गलास्तोत्रम् ॥ २ ॥

अथ कीलकम् ॥ अस्य श्रीकीलकस्तोत्रमंत्रस्य शिव ऋषिः अनुष्टुप्छंदः श्रीमहासरस्वती देवता श्रीजगदंबाप्रीत्यर्थं सप्तशतीपाठांगजपे विनियोगः ॥ ॐनमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥ १ ॥ सर्वमेतद्विना यस्तु मन्त्राणामपि कीलकम् ॥ सोपि क्षेममवाप्नोति सततं जाप्य-

तत्परः ॥ २ ॥ सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ॥ एतेन स्तुवतां नित्यं स्तोत्रमात्रेण सिद्ध्यति ॥ ३ ॥ न मन्त्रो नौषधं तत्र न किंचिदपि विद्यते ॥ विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥ ४ ॥ समग्राण्यपि सिद्ध्यंति लोकशंकामिमां हरः ॥ कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥ स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार सः ॥ समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ॥ ६ ॥ सोपि क्षेममवाप्नोति सर्वमेव न संशयः ॥ कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥ ७ ॥ ददाति प्रतिगृह्णाति

नान्यथैषा प्रसीदति ॥ इत्थंरूपेण कीलेन महादेवेन कीलितम् ॥ ८ ॥ यो निष्कीलां विधायैनां नित्यं जपति सुस्फुटम् ॥ स सिद्धः सगणः सोऽपि गन्धर्वो जायते वने ॥ ९ ॥ न चैवाप्यटतस्तस्य भयं क्वापि हि जायते ॥ नाऽपमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥ १० ॥ ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥ ११ ॥ सौभाग्यादि च यत्किंचिद्दृश्यते ललनाजने ॥ तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥ १२ ॥ शनैस्तु जप्यमानेस्मिन्स्तोत्रे सम्पत्तिरुच्चकैः ॥ भवत्येव समग्रापि ततः

प्रारभ्यमेव तत् ॥ १३ ॥ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ॥ शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ १४॥ भगवत्याः कीलकस्तोत्रम् ॥ ३ ॥

ॐ अस्य श्रीनवार्णमंत्रस्य ॥ ब्रह्मविष्णुरुद्रा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ नंदाशाकंभरीभीमाः शक्तयः ॥ रक्तदंतिकादुर्गाभ्रामर्यो बीजानि ॥ अग्निवायुसूर्यास्तत्त्वानि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थं जपे विनियोगः ॥ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि ॥ गायत्र्युष्णिगनु-

ष्टुप्छंदोभ्यो नमः मुखे ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वती-
देवताभ्यो नमः हृदि ॥ नंदाशाकम्भरीभीमाशक्तिभ्यो नमो
दक्षिणस्तने ॥ रक्तदंतिकादुर्गाभ्रामरीबीजेभ्यो नमो वामस्तने ॥
अग्निवायुसूर्यतत्त्वेभ्यो नमो नाभौ ॥ इति ऋष्यादिन्यासः ॥
मूलेन करौ संशोध्य ॥

अथैकादशन्यासाः ॥ तत्रादौ मातृकान्यासः ॥ सर्वत्रादौ
प्रणवोच्चारः ॥ अंनमो ललाटे ॥ आंनमो मुखवृत्ते ॥ इंनमो
दक्षिणनेत्रे ॥ ईंनमो वामनेत्रे ॥ उंनमो दक्षिणकर्णे ॥ ऊंनमो
वामकर्णे ॥ ऋंनमो दक्षिणनसि ॥ ॠंनमो वामनसि ॥ ऌंनमो

दक्षिणगंडे ॥ लॄंनमो वामगंडे ॥ एंनमः ऊर्ध्वोष्ठे ॥ ऐंनमोऽधरोष्ठे ॥ ओंनम ऊर्ध्वदंतपंक्तौ ॥ औंनमोऽधोदंतपंक्तौ ॥ अंनमः शिरसि ॥ अःनमो मुखे ॥ कंनमो दक्षबाहुमूले ॥ खंनमो दक्षकूर्परे ॥ गंनमो दक्षमणिबंधे ॥ घंनमो दक्षांगुलिमूले ॥ ङंनमो दक्षांगुल्यग्रे ॥ चंनमो वामबाहुमूले ॥ छंनमो वामकूर्परे ॥ जंनमो वाममणिबंधे ॥ झंनमो वामांगुलिमूले ॥ ञंनमो वामांगुल्यग्रे ॥ टंनमो दक्षपादमूले ॥ ठंनमो दक्षजानुनि ॥ डंनमो दक्षगुल्फे ॥ ढंनमो दक्षपादांगुलिमूले ॥ णंनमो दक्षपादांगुल्यग्रे ॥ तंनमो वामपादमूले ॥ थंनमो वामजा-

नुनि ॥ दंनमो वामगुल्फे ॥ धंनमो वामपादांगुलिमूले ॥ नंनमो वामपादांगुल्यग्रे ॥ पंनमो दक्षपार्श्वे ॥ फंनमो वामपार्श्वे ॥ बंनमः पृष्ठे ॥ भंनमो नाभौ ॥ मंनमो जठरे ॥ यंनमो हृदि ॥ रंनमो दक्षांसे ॥ लंनमः ककुदि ॥ वंनमो वामांसे ॥ शंनमो हृदादिदक्षहस्तांते ॥ षंनमो हृदादिवामहस्तांते ॥ संनमो हृदादिदक्षपादांते ॥ हंनमो हृदादिवामपादांते ॥ ळंनमो जठरे ॥ क्षंनमो मुखे ॥ इति मातृकान्यासो देवसारूप्यप्रदः प्रथमः ॥ १ ॥ ऐंह्रींक्लींनमः कनिष्ठयोः ॥ ऐंह्रींक्लींनमोऽनामिकयोः ॥ ऐंह्रींक्लींनमो मध्यमयोः ॥ ऐंह्रींक्लींनमस्तर्जन्योः ॥ ऐंह्रींक्लींनमोंगुष्ठयोः ॥

ऐंह्रींक्लींनमः करमध्ये ॥ ऐंह्रींक्लींनमः करपृष्ठे ॥ ऐंह्रींक्लींनमो मणिबंधयोः ॥ ऐंह्रींक्लींनमः कर्पूरयोः ॥ ऐंह्रींक्लींनमः हृदयाय नमः ॥ ऐंह्रींक्लींनमः शिरसे स्वाहा ॥ ऐंह्रींक्लींनमः शिखायै वषट् ॥ ऐंह्रींक्लींनमः कवचाय हुं ॥ ऐंह्रींक्लींनमो नेत्रत्र-याय वौषट् ॥ ऐंह्रींक्लींनमोऽस्त्राय फट् ॥ इति सारस्वतो जा-ड्यविनाशको द्वितीयः ॥ २ ॥ ह्रींब्राह्मी पूर्वस्यां मां पातु ॥ ह्रींमाहेश्वरी आग्नेय्यां मां पातु ॥ ह्रींकौमारी दक्षिणस्यां मां पातु ॥ ह्रींवैष्णवी नैर्ऋत्यां मां पातु ॥ ह्रींवाराही पश्चिमायां मां पातु ॥ ह्रींइंद्राणी वायव्यां मां पातु ॥ ह्रींचामुंडा

उत्तरस्यां मां पातु ॥ ह्रींमहालक्ष्मीरैशान्यां मां पातु ॥ ह्रींव्यो-
मेश्वरी ऊर्ध्वं मां पातु ॥ ह्रींसप्तद्वीपेश्वरी भूमौ मां पातु ॥
ह्रींकामेश्वरी पाताले मां पातु ॥ इति मातृगणन्यासस्त्रैलो-
क्यविजयप्रदस्तृतीयः ॥ ३ ॥ कमलांकुशमंडिता नंदजा
पूर्वांगं मे पातु ॥ खड्गपात्रधरा रक्तदंतिका दक्षिणांगं मे
पातु ॥ पुष्पपल्लवसंयुता शाकंभरी पश्चिमांगं मे पातु ॥ धनु-
र्बाणकरा दुर्गा वामांगं मे पातु ॥ शिरःपात्रकरा भीमा मस्त-
काच्चरणावधि मां पातु ॥ चित्रकांतिभृद्भ्रामरी पादादि मस्त-
कांतं मे पातु ॥ इति जरामृत्युहरो नंदजादिन्यासश्चतुर्थः

॥ ४ ॥ पादादिनाभिपर्यंतं ब्रह्मा मां पातु ॥ नाभेर्विशुद्धि-
पर्यंतं जनार्दनो मां पातु ॥ विशुद्धेर्ब्रह्मरंध्रांतं रुद्रो मां पातु ॥
हंसः पदद्वयं मे पातु ॥ वैनतेयः करद्वयं मे पातु ॥ वृषभ-
श्चक्षुषी मे पातु ॥ गजाननः सर्वांगं मे पातु ॥ आनंदमयो
हरिः परापरौ देहभागौ मे पातु ॥ इति सर्वकामदो ब्रह्मा-
दिन्यासः पंचमः ॥५॥ अष्टादशभुजा लक्ष्मीर्मध्यभागं मे पातु ॥
अष्टभुजा महासरस्वती ऊर्ध्वभागं मे पातु ॥ दशभुजा महा-
काली अधोभागं मे पातु ॥ सिंहो हस्तद्वयं मे पातु ॥
परहंसोऽक्षियुगं मे पातु ॥ महिषारूढो यमः पदद्वयं मे

पातु ॥ महेशश्चंडिकायुक्तः सर्वांगं मे पातु ॥ इति महालक्ष्म्यादिन्यासः सद्गतिप्रदः षष्ठः ॥ ६ ॥ ऐंनमो ब्रह्मरंध्रे ॥ ह्रींनमो दक्षिणनेत्रे ॥ क्लींनमो वामनेत्रे ॥ चांनमो दक्षिणकर्णे ॥ मुंनमो वामकर्णे ॥ डांनमो दक्षिणनासापुटे ॥ यैंनमो वामनासापुटे ॥ विंनमो मुखे ॥ च्चेंनमो गुह्ये ॥ इति मूलाक्षरन्यासो रोगक्षयकरः सप्तमः ॥ ७ ॥ च्चेंनमो गुह्ये ॥ विंनमो मुखे ॥ यैंनमो वामनासापुटे ॥ डांनमो दक्षिणनासापुटे ॥ मुंनमो वामकर्णे ॥ चांनमो दक्षकर्णे ॥ क्लींनमो वामनेत्रे ॥ ह्रींनमो दक्षनेत्रे ॥ ऐंनमो ब्रह्मरंध्रे ॥ इति विलोमाक्षरन्यासः

सर्वदुःखनाशकोऽष्टमः ॥ ८ ॥ मूलमुच्चार्य ॥ मस्तकाच्चरणांतं चरणान्मस्तकांतं अष्टवारं व्यापकं कुर्यात् ॥ स यथा ॥ प्रथमं पुरतो मूलेन मस्तकाच्चरणावधि ॥ १ ॥ ततश्चरणा-न्मस्तकावधि मूलोच्चारेण व्यापकम् ॥ २ ॥ एवं दक्षिणतः पश्चाद्वामभागे चेति प्रतिदिग्भागेऽनुलोमविलोमतया द्विर्द्वि-रिति अष्टवारं व्यापकं भवति ॥ इति देवताप्राप्तिकरो मूल-व्यापको नवमः ॥ ९ ॥ मूलमुच्चार्य हृदयाय नमः ॥ एवं प्रत्यंगं सर्वत्र मूलमुच्चार्य षडंगेषु न्यसेत् ॥ इति मूलषडंगन्या-सस्त्रैलोक्यवशकरो दशमः ॥ १० ॥ खड्गिनी शूलिनी घोरा

गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडीपरि-
घायुधा ॥ १ ॥ सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥ २ ॥ यच्च किंचित्क्वचि-
द्वस्तु सदसद्वाखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं
किं स्तूयते मया ॥ ३ ॥ यया त्वया जगत्स्रष्टा जगत्पातात्ति
यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः
॥ ४ ॥ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतो-
तस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ ५ ॥ आद्यं वाग्बीजं कृष्णतरं
ध्यात्वा सर्वांगे विन्यसामि ॥ इति सर्वांगे न्यसेत् ॥ ॥ शूलेन

पाहि नो देवि पाहि खड्गेन चांबिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ १ ॥ प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ यानि चात्यंत-घोराणि तै रक्षास्मांस्तथा भुवम् ॥ ३ ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेंऽबिके ॥ करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥४॥ द्वितीयं मायाबीजं सूर्यसदृशं ध्यात्वा सर्वांगे विन्यसेत् ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ १ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभू-

षितम् ॥ पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते ॥ २ ॥ ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते ॥ ३ ॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव ॥ ४ ॥ असुरासृग्वसापंकचर्चितस्ते करोज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयम् ॥ ५ ॥ तृतीयं कामबीजं स्फटिकाभं ध्यात्वा सर्वांगे विन्यसामि ॥ इति सर्वांगे विन्यसेत् ॥ इति सूक्तादिबीजत्रयन्यासः पंचमः ॥ सर्वानिष्टहरः सर्वाभीष्टदः सर्वरक्षाकरश्चैकादशः ॥ ११ ॥ ॥(अथ मूलषडं-

गन्यासः ॥ ॐ ऐं अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ क्लीं मध्यमाभ्यां नमः ॥ ॐ चामुंडायै अनामिकाभ्यां नमः ॥ ॐ विच्चे कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि ॥ ततोऽक्षरन्यासः ॥ ॐ ऐंनमः शिखायां ॥ ॐ ह्रींनमः दक्षिणनेत्रे ॥ ॐ क्लींनमः वामनेत्रे ॥ ॐ चांनमः दक्षिणकर्णे ॥ ॐ मुंनमः वामकर्णे ॥ ॐ डांनमः दक्षिणनासायां ॥ ॐ यैंनमः वामनासायां ॥ ॐ विंनमः मुखे ॥ ॐ च्चेंनमः गुह्ये ॥ एवं विन्यस्याष्टवारं मूलेन व्यापकं कुर्यात् ॥ ॥ अथाङ्गन्यासः ॥ ॐ ऐं प्राच्यै नमः ॥ ॐ ऐं-

आग्नेय्यै नमः ॥ ॐह्रींदक्षिणायै नमः ॥ ॐह्रींनैर्ऋत्यै नमः ॥ ॐक्लींप्रतीच्यै नमः ॥ ॐक्लींवायव्यै नमः ॥ ॐचामुंडायै उदीच्यै नमः ॥ ॐविच्चे ईशान्यै नमः ॥ ॐऐंह्रींक्लींचामुंडायै विच्चे ऊर्ध्वायै नमः ॥ ॐऐंह्रींक्लींचामुंडायै विच्चे भूम्यै नमः ॥ अथ ध्यानं ॥ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीं शिरः शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ॥ नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभम् ॥ १ ॥ अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुः कुंडिकां दण्डं शक्तिमसिं च चर्म जलजं घंटां सुरा-

भाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ २ ॥ घंटाशूलहलानि शंखमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥ ३ ॥ मानसोपचारैः संपूज्य ॥ ॐमां माये महामाले सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मां सिद्धिदा भव ॥ १ ॥ इति मालां प्रार्थ्य ॥ ॐसिद्ध्यै नमः इति मालां नत्वा जपेत् ॥ मंत्रार्थस्तु महासरस्वत्यादिरूपे चित्सदानं-

दमथे चंडिके त्वां ब्रह्मविद्याप्राप्त्यर्थं वयं सर्वदा ध्यायामः ॥ इत्यर्थानुसंधानपूर्वकं नवार्णमंत्रं १०८ वारं जप्त्वा षडंगन्यासं कृत्वा रात्रिसूक्तं जपेत् ॥ तद्वैदिकं पौराणं वा ॥ ॥ तत्रेदं वैदिकं ॥ रात्रीति सूक्तस्य कुशिक ऋषिः रात्रिर्देवता ॥ गायत्री च्छंदः ॥ श्रीजगदंबाप्रीत्यर्थे सप्तशतीपाठादौ जपे विनियोगः ॥ ॐरात्री व्यख्यदायती पुरुत्रा देव्य १ क्षभिः ॥ विश्वा अधिश्रियोधित ॥ ओर्वप्रा अमर्त्या निवतो देव्यु १ द्वतः ॥ ज्योतिषा बाधते तमः ॥ निरु स्वसारम-स्कृतोषसं देव्यायती ॥ अपेदुहासते तमः ॥ सा नो अद्य यस्या

वयं नि ते यामन्नविक्ष्महि ॥ वृक्षे न वसतिं वयः ॥ नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ॥ नि श्येनासश्चिदर्थिनः ॥ यावया वृक्यं वृकं यवय स्तेनमूर्म्ये ॥ अथा नः सुतरा भव ॥ उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित ॥ उष ऋणेव यातय ॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ॥ रात्रि स्तोमं न जिग्युषे ॥ इति ॥ ॥ अथ पौराणं ॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ १ ॥ ब्रह्मोवाच ॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्ये त्रिधा

मात्रात्मिका स्थिता ॥ २ ॥ अर्धमात्रास्थिता नित्या यानु-
च्चार्या विशेषतः ॥ त्वमेव संध्या सावित्री त्वं देवि जननी
परा ॥ ३ ॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥
त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ ४ ॥ विसृष्टौ सृष्टि-
रूपा त्वं स्थितिरूपा च पालने ॥ तथा संहृतिरूपांते जगतोस्य
जगन्मये ॥ ५ ॥ महाविद्या महामाया महामेधा महास्मृतिः ॥
महामोहा च भवति महादेवि महेश्वरी ॥ ६ ॥ प्रकृतिस्त्वं च
सर्वस्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च
दारुणा ॥ ७ ॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधल-

क्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ॥ ८ ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ ९ ॥ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥ १० ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाऽखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ११ ॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ १२ ॥ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं

शक्तिमान्भवेत् ॥ १३ ॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ १४ ॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ १५ ॥ इति रात्रिसूक्तं पौराणम् ॥ अथ पल्लवयोजनासंपुटीकरणपाठज्ञापकं यथा ॥ पल्लवप्रकारः सर्वमंगल० इति मंत्रपल्लवे ॐमार्कंडेय उवाच सर्वमंगल० इति प्रणवादिप्रतिसप्तशतीमंत्रांते पल्लवमंत्रं पठेदिति ॥ अथ योजनाप्रकारः ॥ ॐसर्वमं० मार्कंडेय उवाच ॥ इति सप्तशतीप्रतिमंत्रादौ सप्रणवं योजनामंत्रं पठेत् ॥ अथ संपुटीकरण-

प्रकारः॥ ॐशरणा० मार्कण्डेय उवाच शरणा० एवं सप्तशती-मंत्रादौ मंत्रांते च संपुटमंत्रं पठेत् ॥ अयं तु शांतिकपौष्टिक-वशीकरणादिशुभकर्मसु ॥ शत्रुविद्रावणोच्चाटनाद्युग्रकर्मसु तु यथा ॐ-हुं फट् मार्कंडेय उवाच फट् -हुंॐ इति सप्तशती-मंत्रादौ विद्रावणबीजानि पठित्वा तान्येवांते विलोमानि पठेदिति ॥ ॐश्रीगणेशाय नमः ॥ अस्य श्रीसप्तशतीस्तोत्र-मालामंत्रस्य ॥ ब्रह्मविष्णुरुद्रा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभ-श्छंदांसि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ नंदाशाकंभरीभीमाः शक्तयः॥रक्तदंतिकादुर्गाभ्रामर्यो बीजानि

॥ अग्निवायुसूर्यास्तत्त्वानि ॥ ऋग्यजुःसामवेदा ध्यानानि ॥ मम सकलकामनासिद्धये श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थे जपे विनियोगः ॥ तत्रादौ न्यासाः ॥ ॐखड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ अंगुष्ठाभ्यां नमः ॥ ॐशूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ तर्जनीभ्यां नमः ॥ ॐप्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ मध्यमाभ्यां नमः ॥ ॐसौम्यानि यानि रूपाणि

त्रैलोक्ये विचरंति ते ॥ यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भुवम् ॥ अनामिकाभ्यां नमः ॥ ॐखड्गशूलगदादीनि यानि चास्त्राणि तेंबिके ॥ करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥ कनिष्ठिकाभ्यां नमः ॥ ॐसर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि ॥ ॐखड्गिनी शूलिनी घोरा० हृदयाय नमः ॥ ॐशूलेन पाहि नो देवि० शिरसे स्वाहा ॥ ॐप्राच्यां रक्ष प्रतीच्यां च० शिखायै वषट् ॥ ॐसौम्यानि यानि रूपाणि० कवचाय हुं ॥ ॐखड्गशूलग-

दादीनि० नेत्रत्रयाय वौषट् ॥ ॐसर्वस्वरूपे सर्वेशे० अस्त्राय फट् ॥ अथ चंडीपंचाक्षरमंत्रन्यासः ॥ ॐह्रीं हृदयाय नमः ॥ ॐचं शिरसे स्वाहा ॥ ॐडिं शिखायै वषट् ॥ ॐकां कवचाय हुं ॥ ॐयैं नेत्रत्रयाय वौषट् ॥ ॐह्रीं चंडिकायै अस्त्राय फट् ॥ अथ चक्रन्यासः ॥ ॐशंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रां नंदायै अंगुष्ठाभ्यां नमः ॥ ॐशंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रीं रक्तदंतिकायै तर्जनीभ्यां नमः ॥ ॐशंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रुं शाकंभर्यै मध्यमाभ्यां नमः ॥ ॐशंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रैं

दुर्गायै अनामिकाभ्यां नमः ॥ ॐ शंभुतेजोज्वलज्वालामालिनि पावके ह्रौं भीमायै कनिष्ठिकाभ्यां नमः ॥ ॐ शंभुतेजोज्वलज्वालामालिनि पावके ह्रः भ्रामर्यै करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादिषडंगन्यासः ॥ ॥ अथ ध्यानम् ॥ विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रदरालिखेटविशिखांश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ १ ॥ इति ध्यात्वा मनसा संपूज्य ॥

गुरुदेवतात्मैक्यं विभाव्यार्थानुसंधानपूर्वकं मध्यमस्वरेण चंडीस्तवं पठेत् ॥ ॥

सप्तशतीप्रथमचरितम् ॥ प्रथमचरित्रस्य ब्रह्मा ऋषिः ॥ महाकाली देवता ॥ गायत्री छंदः ॥ नंदा शक्तिः ॥ रक्तदंतिका बीजम् ॥ अग्निस्तत्त्वम् ॥ ऋग्वेदः स्वरूपम् ॥ श्रीमहाकालीप्रीत्यर्थं धर्मार्थं जपे विनियोगः ॥ खड्गं चक्रगदेषुचापपरिघान् शूलं भुशुंडीं शिरः शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ॥ नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभम् ॥ ॐनमश्चं-

डिकायै ॥ ॐ ऐं मार्कंडेय उवाच ॥ १ ॥ सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ २ ॥ महामायानुभावेन यथा मन्वंतराधिपः ॥ स बभूव महाभागः सावर्णिस्तनयो रवेः ॥ ३ ॥ स्वारोचिषेंऽतरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजाभूत्समस्ते क्षिति-मण्डले ॥ ४ ॥ तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौर-सान् ॥ बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ ५ ॥ तस्य तैरभवद्युद्धमतिप्रबलदंडिनः ॥ न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ ६ ॥ ततः स्वपुरमायातो निजदे-

शाधिपोऽभवत् ॥ आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥ ७ ॥ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ॥ कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥ ८ ॥ ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ॥ एकाकी हयमारुह्य जगाम गहनं वनम् ॥ ९ ॥ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः ॥ प्रशांतश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥ १० ॥ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ॥ इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥ ११ ॥ सोऽचिंतयत्तदा तत्र ममत्वाकृष्टमानसः ॥ १२ ॥ मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि

तत् ॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ १३ ॥ न जाने स प्रधानो मे शूरो हस्ती सदामदः ॥ मम वैरिवशं यातः कान्भोगानुपलप्स्यते ॥ १४ ॥ ये ममानुगता नित्यं प्रसादधनभोजनैः ॥ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ॥ १५ ॥ असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥ संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ॥ १६ ॥ एतच्चान्यच्च सततं चिंतयामास पार्थिवः ॥ तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ॥ १७ ॥ स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥ सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे

॥ १८ ॥ इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥ प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥ १९ ॥ वैश्य उवाच ॥ २० ॥ समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥ २१ ॥ विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ॥ वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥ २२ ॥ सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥ प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥ २३ ॥ किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतम् ॥ २४ ॥ कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥ २५ ॥

राजोवाच ॥ २६ ॥ यैर्निरस्तो भवांल्लुब्धैः पुत्रदारादिभिर्धनैः ॥ २७ ॥ तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥ २८ ॥ वैश्य उवाच ॥ २९ ॥ एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥ किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥ ३० ॥ यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥ पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ॥ ३१ ॥ किमेतन्नाभिजानामि जानन्नपि महामते ॥ यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु ॥ ३२ ॥ तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥ ३३ ॥ करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥ ३४ ॥ मार्कंडेय

उवाच ॥३५॥ ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥३६॥
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ॥ ३७ ॥ कृत्वा
तु तौ यथान्यायं यथार्हं तेन संविदम् ॥ उपविष्टौ कथाः
काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ ३८ ॥ राजोवाच ॥ ३९ ॥
भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ ४० ॥ दुःखाय
यन्मे मनसः स्वचित्तायत्ततां विना ॥ ४१ ॥ ममत्वं गतरा-
ज्यस्य राज्यांगेष्वखिलेष्वपि ॥ जानतोपि यथाज्ञस्य किमे-
तन्मुनिसत्तम ॥ ४२ ॥ अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथो-
ज्झितः ॥ स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥ ४३ ॥

एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ ॥ दृष्टदोषेऽपि विषये समत्वाकृष्टमानसौ ॥ ४४ ॥ तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ममास्य च भवत्येषा विवेकांधस्य मूढता ॥ ४५ ॥ ऋषिरुवाच ॥ ४६ ॥ ज्ञानमस्ति समस्तस्य जंतो-र्विषयगोचरे ॥ विषयाश्च महाभाग यांति चैवं पृथक् पृथक् ॥ ४७ ॥ दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथापरे ॥ केचि-द्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ४८ ॥ ज्ञानिनो मनुजाः सत्यं किं नु ते न हि केवलम् ॥ यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥ ४९ ॥ ज्ञानं च तन्मनुष्याणां

यत्तेषां मृगपक्षिणाम् ॥ मनुष्याणां च यत्तेषां तुल्यमन्यत्तथो-
भयोः ॥५०॥ ज्ञानेपि सति पश्यैतान्पतंगाञ्छावचंचुषु ॥ कण-
मोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ॥ ५१ ॥ मानुषा
मनुजव्याघ्र साभिलाषाः सुतान्प्रति ॥ लोभात्प्रत्युपकाराय
नन्वेतान्किं न पश्यसि ॥ ५२ ॥ तथापि ममतावर्ते मोहगर्ते
निपातिताः ॥ महामायाप्रभावेण संसारस्थितिकारिणा ॥ ५३ ॥
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥ महामाया हरे-
श्चैषा तया संमोह्यते जगत् ॥ ५४ ॥ ज्ञानिनामपि चेतांसि
देवी भगवती हि सा ॥ बलादाकृष्य मोहाय महामाया

प्रयच्छति ॥ ५५ ॥ तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ ५६ ॥ सा विद्या
परमा मुक्तेर्हेतुभूता सनातनी ॥ ५७ ॥ संसारबंधहेतुश्च सैव
सर्वेश्वरेश्वरी ॥ ५८ ॥ राजोवाच ॥ ५९ ॥ भगवन्का हि सा
देवी महामायेति यां भवान् ॥ ब्रवीति कथमुत्पन्ना सा कर्मा-
स्याश्च किं द्विज ॥ ६० ॥ यत्प्रभावा च सा देवी यत्स्वरूपा
यदुद्भवा ॥ ६१ ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां
वर ॥ ६२ ॥ ऋषिरुवाच ॥ ६३ ॥ नित्यैव सा जगन्मूर्तिस्तया
सर्वमिदं ततम् ॥ ६४ ॥ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां

मम ॥ ६५ ॥ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥ ६६ ॥ योग-
निद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ आस्तीर्य शेषमभज-
त्कल्पांते भगवान्प्रभुः ॥ ६७ ॥ तदा द्वावसुरौ घोरौ विख्यातौ
मधुकैटभौ ॥ विष्णुकर्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ॥ ६८ ॥
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥ दृष्ट्वा
तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥ ६९ ॥ तुष्टाव
योगनिद्रां तामेकाग्रहृदयः स्थितः ॥ विबोधनार्थाय हरे-
र्हरिनेत्रकृतालयाम् ॥ ७० ॥ विश्वेश्वरीं जगद्धात्रीं स्थिति-

संहारकारिणीम् ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ ७१ ॥ ब्रह्मोवाच ॥ ७२ ॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥ ७३ ॥ अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ॥ त्वमेव संध्या सावित्री त्वं देवि जननी परा ॥७४॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ ७५ ॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ तथा संहृतिरूपांते जगतोऽस्य जगन्मये ॥ ७६ ॥ महाविद्या महामाया महामेधा महास्मृतिः ॥

महामोहा च भवती महादेवि महेश्वरी ॥ ७७ ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥७८॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ॥ ७९ ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ ८० ॥ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥८१॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ८२ ॥ यया त्वया जग-

त्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ ८३ ॥ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ ८४ ॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ ८५ ॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ ८६ ॥ बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ ८७ ॥ ऋषिरुवाच ॥ ८८ ॥ एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥ विष्णोः प्रबोधनार्थाय निहंतुं मधुकैटभौ ॥ ८९ ॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथो-

रसः ॥ निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥ ९० ॥ उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥ एकार्णवेऽहि-शयनात्ततः स ददृशे च तौ ॥ ९१ ॥ मधुकैटभौ दुरात्मा-नावतिवीर्यपराक्रमौ ॥ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितो-द्यमौ ॥ ९२ ॥ समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः ॥ पंच वर्षसहस्राणि बाहुप्रहरणो विभुः ॥ ९३ ॥ तावप्यतिबलो-न्मत्तौ महामायाविमोहितौ ॥ ९४ ॥ उक्तवंतौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥ ९५ ॥ श्रीभगवानुवाच ॥ ९६ ॥ भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥ ९७ ॥ किमन्येन

वरेणात्र एतावद्धि वृतं मया ॥ ९८ ॥ ऋषिरुवाच ॥ ९९ ॥
वंचिताभ्यामिति तदा सर्वमापोमयं जगत् ॥ विलोक्य ता-
भ्यां गदितो भगवान्कमलेक्षणः ॥ १०० ॥ आवां जहि न
यत्रोर्वी सलिलेन परिप्लुता ॥ १ ॥ ॥ ऋषिरुवाच ॥ २ ॥
तथेत्युक्त्वा भगवता शंखचक्रगदाभृता ॥ कृत्वा चक्रेण वै
छिन्ने जघने शिरसी तयोः ॥ ३ ॥ एवमेषा समुत्पन्ना ब्रह्म-
णा संस्तुता स्वयम् ॥ प्रभावमस्या देव्यास्तु भूयः शृणु वदा-
मि ते ॥ ४ ॥ ऐंॐ ॥ श्रीमार्कण्डेयपुराणे सावर्णिके मन्व-
न्तरे देवीमाहात्म्ये प्रथमः ॥ १ ॥ उवाचमंत्राः ॥ १४ ॥

अर्धमंत्राः ॥ २४ ॥ श्लोकमंत्राः ॥ ६६ ॥ एवं मंत्राः ॥ १०४॥ मध्यमचरितस्य ॥ विष्णुर्ऋषिः ॥ महालक्ष्मीर्देवता ॥ उष्णिक्छंदः ॥ शाकंभरी शक्तिः ॥ दुर्गा बीजम् ॥ वायुस्तत्त्वम् ॥ यजुर्वेदः स्वरूपं ॥ महालक्ष्मीप्रीत्यर्थं अर्थार्थे जपे विनियोगः ॥ ध्यानं ॥ अक्षस्रक्परशू० ॥ ॐ ह्रीं ऋषिरुवाच ॥ १ ॥ देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥ महिषेऽसुराणामधिपे देवानां च पुरंदरे ॥ २ ॥ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ॥ जित्वा च सकलान्देवानिंद्रोऽभून्महिषासुरः ॥ ३ ॥ ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ॥ पुरस्कृत्य गतास्तत्र

यत्रेशगरुडध्वजौ ॥ ४ ॥ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टि-
तम् ॥ त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥ ५ ॥ सूर्ये-
न्द्राग्न्यनिलेंदूनां यमस्य वरुणस्य च ॥ अन्येषां चाधिकारान्सः
स्वयमेवाधितिष्ठति ॥ ६ ॥ स्वर्गान्निराकृताः सर्वे तेन देवग-
णा भुवि ॥ विचरंति यथा मर्त्या महिषेण दुरात्मना ॥ ७ ॥
एतद्वः कथितं सर्वममरारिविचेष्टितम् ॥ शरणं च प्रपन्नाः
स्मो वधस्तस्य विचिंत्यताम् ॥ ८ ॥ इत्थं निशम्य देवानां
वचांसि मधुसूदनः ॥ चकार कोपं शंभुश्च भ्रुकुटीकुटिलान-
नौ ॥ ९ ॥ ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ॥ निश्च-

क्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥ १० ॥ अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥ निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥ ११ ॥ अतीव तेजसः कूटं ज्वलंतमिव पर्वतम् ॥ ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरम् ॥ १२ ॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ॥ एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥ १३ ॥ यदभूच्छांभवं तेजस्तेनाजायत तन्मुखम् ॥ याम्येन चाभवन्केशा बाहवो विष्णुतेजसा ॥ १४ ॥ सौम्येन स्तनयोर्युग्मं मध्यं चैंद्रेण चाभवत् ॥ वारुणेन च जंघोरू नितंवस्तेजसा भुवः ॥ १५ ॥ ब्रह्मणस्तेजसा पादौ तदं-

गुल्योऽर्कतेजसा ॥ वसूनां च करांगुल्यः कौबेरेण च नासिका ॥ १६ ॥ तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा ॥ नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ १७ ॥ भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च ॥ अन्येषां चैव देवानां संभवस्तेजसां शिवा ॥ १८ ॥ ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ॥ तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥ १९ ॥ ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च ॥ शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ॥ २० ॥ चक्रं च दत्तवान्कृष्णः समुत्पाट्य स्वचक्रतः ॥ शंखं च वरुणः शक्तिं द-

दौ तस्यै हुताशनः ॥ २१ ॥ मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥ वज्रमिंद्रः समुत्पाद्य कुलिशादमराधिपः ॥ २२ ॥ ददौ तस्यै सहस्राक्षो घंटामैरावताद्गजात् ॥ कालदंडाद्यमो दंडं पाशं चाम्बुपतिर्ददौ ॥ २३ ॥ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुम् ॥ समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ॥ २४ ॥ कालश्च दत्तवान्खड्गं तस्यै चर्म च निर्मलम् ॥ क्षीरोदश्चामलं हारमजरे च तथांबरे ॥ २५ ॥ चूडामणिं तथा दिव्यं कुंडले कटकानि च ॥ अर्धचंद्रं तथा शुभ्रं केयूरान्सर्वबाहुषु ॥ २६ ॥ नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्त-

मम् ॥ अंगुलीयकरत्नानि समस्तास्वंगुलीषु च ॥ २७ ॥ विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥ अस्त्राण्यनेकरूपाणि तथाऽभेद्यं च दंशनम् ॥ २८ ॥ अम्लानपंकजां मालां शिरस्युरसि चापराम् ॥ अददज्जलधिस्तस्यै पंकजं चातिशोभनम् ॥ २९ ॥ हिमवान्वाहनं सिंहं रत्नानि विविधानि च ॥ ददावशून्यं सुरया पानपात्रं धनाधिपः ॥ ३० ॥ शेषश्च सर्वनागेशो महामणिविभूषितम् ॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ॥ ३१ ॥ अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ संमानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥ ३२ ॥

तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ अमायतातिम-
हता प्रतिशब्दो महानभूत् ॥ ३३ ॥ चुक्षुभुः सकला लोकाः
समुद्राश्च चकंपिरे ॥ चचाल वसुधा चेलुः सकलाश्च मही-
धराः ॥ ३४ ॥ जयेति देवाश्च मुदा तामूचुः सिंहवाहि-
नीम् ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥ ३५ ॥ दृष्ट्वा
समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ सन्नद्धाखिलसैन्यास्ते
समुत्तस्थुरुदायुधाः ॥ ३६ ॥ आः किमेतदिति क्रोधादा-
भाष्य महिषासुरः ॥ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः
॥ ३७ ॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥

पादाक्रांत्या नतभुवं किरीटोल्लिखितांबराम् ॥ ३८ ॥ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥ दिशो भुजसहस्रेण समंताद्व्याप्य संस्थिताम् ॥ ३९ ॥ ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगंतरम् ॥ ४० ॥ महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः ॥ ४१ ॥ रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ अयुध्यतायुतानां च सहस्रेण महाहनुः ॥ ४२ ॥ पंचाशद्भिश्च नियुतैरसिलोमा महासुरः ॥ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥ ४३ ॥

गजवाजिसहस्रौघैरनेकैः परिवारितः ॥ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥ ४४ ॥ बिडालाख्योऽयुतानां च पंचाशद्भिरथायुतैः ॥ युयुधे संयुगे तत्र रथानां परिवारितः ॥ ४५ ॥ अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥ युयुधुः संयुगे देव्या सह तत्र महासुराः ॥ ४६ ॥ कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥ हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥ ४७ ॥ तोमरैर्भिंदिपालैश्च शक्तिभिर्मुसलैस्तथा ॥ युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥ ४८ ॥ केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥ देवीं खड्ग-

प्रहारैस्तु ते तां हंतुं प्रचक्रमुः ॥ ४९ ॥ सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥ ५० ॥ अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥ ५१ ॥ सोपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ चचारासुरसैन्येषु वनेष्विव हुताशनः ॥ ५२ ॥ निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥ त एव सद्यः संभूता गणाः शतसहस्रशः ॥ ५३ ॥ युयुधुस्ते परशुभिर्भिंदिपालासिपट्टिशैः ॥ नाशयंतो सुरगणान्देवीशक्त्युपबृंहिताः ॥ ५४ ॥ अवादयंत पटहान्

गणाः शंखांस्तथापरे ॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥ ५५ ॥ ततो देवी त्रिशूलेन गदया शक्तिऋष्टिभिः ॥ खड्गादिभिश्च शतशो निजघान महासुरान् ॥ ५६ ॥ पातयामास चैवान्यान्घंटास्वनविमोहितान् ॥ असुरान् भुवि पाशेन बध्वा चान्यानकर्षयत् ॥ ५७ ॥ केचिद्द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ विपोथिता निपातेन गदया भुवि शेरते ॥ ५८ ॥ वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥ केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ॥ ५९ ॥ निरंतराः शरौघेण कृताः केचिद्रणाजिरे ॥ सेनानुकारिणः प्राणा-

न्मुमुचुस्त्रिदशार्दनाः ॥ ६० ॥ केषांचिद्बाहवश्छिन्नाश्छिन्न-
ग्रीवास्तथा परे ॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः
॥ ६१ ॥ विच्छिन्नजंघास्त्वपरे पेतुरुर्व्यां महासुराः ॥ एकबा-
ह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः ॥ ६२ ॥ छिन्नेपि चान्ये
शिरसि पतिताः पुनरुत्थिताः ॥ ननृतुश्चापरे तत्र युद्धे
तूर्यलयाश्रिताः ॥ ६३ ॥ कबंधाश्छिन्नशिरसः खड्गश-
क्त्यृष्टिपाणयः ॥ तिष्ठ तिष्ठेति भाषंतो देवीमन्ये महा-
सुराः ॥ ६४ ॥ पातितै रथनागाश्वैरसुरैश्च वसुंधरा । अग-
म्या साऽभवत्तत्र यत्राभूत्स महारणः ॥ ६५ ॥ शोणितौघा

महानद्यः सद्यस्तत्र प्रसुस्रुवुः ॥ मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ६६ ॥ क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ॥ निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥ ६७ ॥ स च सिंहो महानादमुत्सृजन्धुतकेसरः ॥ शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ६८ ॥ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ॥ यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६९ ॥ मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महि० द्वितीयः ॥ २ ॥ उवाचमंत्रः ॥ १ ॥ श्लोकमंत्राः ॥ ६८ ॥ एवं ॥ ६९ ॥ एवमादितः ॥ १७३ ॥

ऋषिरुवाच ॥ १ ॥ निहन्यमानं तत्सैन्यमवलोक्य महासुरः ॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकाम् ॥ २ ॥ स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥ यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः ॥ ३ ॥ तस्य छित्त्वा ततो देवी लीलयैव शरोत्क-रान् ॥ जघान तुरगान्बाणैर्यंतारं चैव वाजिनाम् ॥ ४ ॥ चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ॥ विव्याध चैव गात्रेषु च्छिन्नधन्वानमाशुगैः ॥ ५ ॥ स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ अभ्यधावत तां देवीं खड्गच-र्मधरोऽसुरः ॥ ६ ॥ सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्ध-

नि ॥ आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥ ७॥ तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ॥ ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ८ ॥ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥ जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात् ॥ ९ ॥ दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ॥ तेन तच्छतधा नीतं शूलं स च महासुरः ॥ १० ॥ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥ आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ ११ ॥ सोऽपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतम् ॥ हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥ १२ ॥ भग्नां शक्तिं

निपतितां दृष्ट्वा क्रोधसमन्वितः ॥ चिक्षेप चामरः शूलं बाणै-स्तदपि साच्छिनत् ॥ १३ ॥ ततः सिंहः समुत्पत्य गजकुंभान्तरे स्थितः ॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १४ ॥ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥ युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १५ ॥ ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ॥ करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥ १६ ॥ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ॥ दंतमुष्टितलैश्चैव करालश्च निपातितः ॥ १७ ॥ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ॥ बाष्कलं भिंदिपालेन बाणै-

स्ताम्रं तथांधकम् ॥ १८ ॥ उग्रास्यमुग्रवीर्यं च तथैव च महा-
हनुम् ॥ त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ १९ ॥
बिडालस्यासिना कायात्पातयामास वै शिरः ॥ दुर्धरं दुर्मुखं
चोभौ शरैर्निन्ये यमक्षयम् ॥ २० ॥ एवं संक्षीयमाणे तु
स्वसैन्ये महिषासुरः ॥ माहिषेण स्वरूपेण त्रासयामास तान्
गणान् ॥ २१ ॥ कांश्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान् ॥
लांगूलताडितांश्चान्यान्शृंगाभ्यां च विदारितान् ॥ २२ ॥
वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ॥ निःश्वासपवनेना-
न्यान्पातयामास भूतले ॥ २३ ॥ निपात्य प्रमथानीकम-

भ्यधावत सोऽसुरः ॥ सिंहं हंतुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ २४ ॥ सोपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ॥ शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ २५ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥ लांगूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २६ ॥ धुतशृंगविभिन्नाश्च खंडं खंडं ययुर्घनाः ॥ श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ २७ ॥ इति क्रोधसमाध्मातमापतंतं महासुरम् ॥ दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् ॥ २८ ॥ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरम् ॥ तत्याज माहिषं रूपं

सोऽपि बद्धो महामृधे ॥ २९ ॥ ततः सिंहोऽभवत्सद्यो याव-
त्तस्याम्बिका शिरः ॥ छिनत्ति तावत्पुरुषः खड्गपाणिरदृ-
श्यत ॥ ३० ॥ तत एवाशु पुरुषं देवी चिच्छेद सायकैः ॥
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥ ३१ ॥ करेण च
महासिंहं तं चकर्ष जगर्ज च ॥ कर्षतस्तु करं देवी खड्गेन
निरकृंतत ॥ ३२ ॥ ततो महासुरो भूयो माहिषं वपुरा-
स्थितः ॥ तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥ ३३ ॥
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥ पपौ पुनः
पुनश्चैव जहासारुणलोचना ॥ ३४ ॥ ननर्द चासुरः सोऽपि

बलवीर्यमदोद्धतः ॥ विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान् ॥ ३५ ॥ सा च तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः ॥ उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥ ३६ ॥ देव्युवाच ॥ ३७ ॥ गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ॥ मया त्वयि हतेऽत्रैव गर्जिष्यंत्याशु देवताः ॥३८॥ ऋषिरुवाच ॥ ३९ ॥ एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम् ॥ पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ॥ ४० ॥ ततः सोऽपि पदाक्रांतस्तया निजमुखात्तदा ॥ अर्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृतः ॥ ४१ ॥ अर्धनिष्क्रांत एवासौ युध्यमानो

महासुरः ॥ तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥ ४२ ॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥ प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४३ ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४४ ॥ मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये तृतीयः ॥ ३ ॥ उवाच ॥ ३ ॥ श्लोकाः ॥ ४१ ॥ एवं ॥ ४४ ॥ एवमादितः ॥ २१७ ॥

ऋषिरुवाच ॥ १ ॥ शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिन-

स्त्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥
देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिस-
मूहमूर्त्या ॥ तामंबिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः
स्म विदधातु शुभानि सा नः ॥ ३ ॥ यस्याः प्रभावमतुलं
भगवाननंतो ब्रह्मा हरश्च नहि वक्तुमलं बलं च ॥ सा
चण्डिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं
करोतु ॥ ४ ॥ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा सतां कुलजन-
प्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम्

॥ ५ ॥ किं वर्णयाम तव रूपमचिंत्यमेतत्किं चातिविर्यमसुरक्षयकारि भूरि ॥ किं चाहवेषु चरितानि तवाति यानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥ सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥ यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८ ॥ या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सुनियतेंद्रियतत्वसारैः ॥ मोक्षा-

र्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्याऽसि सा भगवती परमा हि देवी ॥ ९ ॥ शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम् ॥ देवि त्रयी भगवती भव भावनाय वार्तासि सर्वजगतां परमार्तिहंत्री ॥ १० ॥ मेधासि देवि विदिताखिलशास्त्रसारा दुर्गाऽसि दुर्गभवसागरनौरसंगा ॥ श्रीः कैटभारिहृदयैककृताधिवासा गौरि त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥ ईषत्सहासममलं परिपूर्णचंद्रबिम्बानुकारि कनकोत्तमकांति कांतम् ॥ अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२ ॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि-
यन्न सद्यः ॥ प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते
हि कुपितांतकदर्शनेन ॥ १३ ॥ देवि प्रसीद परमा भवती
भवाय सद्यो विनाशयसि कोपवती कुलानि ॥ विज्ञातमेतद-
धुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥
ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति
बंधुवर्गः ॥ धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदा-
भ्युदयदा भवती प्रसन्ना ॥ १५ ॥ धर्म्याणि देवि सकलानि
सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥ स्वर्गं प्रयाति

च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ १६ ॥ दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥ दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥ १७ ॥ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नाम नरकाय चिराय पापम् ॥ संग्राममृत्युमधिगम्य दिवं प्रयांतु मत्वेति नूनमहितान्विनिहंसि देवि ॥ १८ ॥ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ॥ लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वहितेषु साध्वी

॥ १९ ॥ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशो सुराणाम् ॥ यन्नागता विलयमंशुमदिंदुखंडयोग्यानननं तव विलोकयतां तदेतत् ॥ २० ॥ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः ॥ वीर्यं च हंतृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२१॥ केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२ ॥ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ॥ नीता दिवं

रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते ॥ २३ ॥
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घण्टास्वनेन नः
पाहि चापज्यानिःस्वनेन च ॥ २४ ॥ प्राच्यां रक्ष प्रतीच्यां
च चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां
तथेश्वरि ॥ २५ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति
ते ॥ यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भुवम् ॥ २६ ॥
खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥ करपल्लवसं-
गीनि तैरस्मान् रक्ष सर्वतः ॥ २७ ॥ ऋषिरुवाच ॥ २८ ॥
एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिता जगतां

धात्री तथा गंधानुलेपनैः ॥ २९ ॥ भक्त्या समस्तैस्त्रिदशै-र्दिव्यैर्धूपैः सुधूपिता ॥ प्राह प्रसादसुमुखी समस्तान्प्रणता-न्सुरान् ॥ ३० ॥ देव्युवाच ॥ ३१ ॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवांछितम् ॥ ३२ ॥ देवा ऊचुः ॥ ३३ ॥ भग-वत्या कृतं सर्वं न किंचिदवशिष्यते ॥ यदयं निहतः शत्रु-रस्माकं महिषासुरः ॥ ३४ ॥ यदि चापि वरो देयस्त्वया-स्माकं महेश्वरि ॥ संस्मृता संस्मृता त्वं नो हिंसेथाः परमा-पदः ॥ ३५ ॥ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम् ॥ ३६ ॥ वृद्धयेऽस्म-

त्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ ३७ ॥ ऋषिरुवाच ॥ ३८ ॥
इति प्रसादिता देवैर्जगतोर्थे तथात्मनः ॥ तथेत्युक्त्वा भद्र-
काली बभूवांतर्हिता नृप ॥ ३९ ॥ इत्येतत्कथितं भूप संभूता
सा यथा पुरा ॥ देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४० ॥
पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ॥ वधाय दुष्टदै-
त्यानां तथा शुंभनिशुंभयोः ॥ ४१ ॥ रक्षणाय च लोकानां
देवानामुपकारिणी ॥ तच्छृणुष्व मयाख्यातं यथावत्कथयामि
ते ह्रीं ॐ ॥ ४२ ॥ श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे
देवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतुर्थः ॥ ४ ॥ उवाचमंत्राः

॥ ५ ॥ अर्धमंत्राः ॥ २ ॥ श्लोकमंत्राः ॥ ३५ ॥ एवं ॥ ४२ ॥
एवमादितः ॥ २५९ ॥

उत्तमचरितस्य रुद्र ऋषिः ॥ महासरस्वती देवता ॥ अनुष्टुप् छंदः ॥ भीमा शक्तिः ॥ भ्रामरी बीजं ॥ सूर्यस्तत्त्वं ॥ सामवेदः स्वरूपं ॥ महासरस्वतीप्रीत्यर्थे कामार्थे जपे वि० ॥ ध्यानं ॥ घंटाशूल० ॥ ॐ क्लीं ऋषिरुवाच ॥ १ ॥ पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः ॥ त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ २ ॥ तावेव सूर्यतां तद्वदधिकारं तथैंदवम् ॥ कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३ ॥ तावेव

पवनर्द्धिं च चक्रतुर्वह्निकर्म च ॥ ततो देवा विनिर्धूता भ्रष्ट-
राज्याः पराजिताः ॥ ४ ॥ हृताधिकारास्त्रिदशास्ताभ्यां
सर्वे निराकृताः ॥ महासुराभ्यां तां देवीं संस्मरंत्यपराजि-
ताम् ॥ ५ ॥ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥
भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥ ६ ॥ इति कृत्वा
मतिं देवा हिमवंतं नगेश्वरम् ॥ जग्मुस्तत्र ततो देवीं विष्णु-
मायां प्रतुष्टुवुः ॥ ७ ॥ देवा ऊचुः ॥ ८ ॥ नमो देव्यै महा-
देव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः
प्रणताःस्म ताम् ॥ ९ ॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै

नमो नमः ॥ ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ॥ १० ॥ कल्याण्यै प्रणतावृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः ॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ११ ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १२ ॥ अतिसौम्यातिरौद्रायै नतास्त-स्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ १३ ॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नम-स्तस्यै नमो नमः ॥ १४ ॥ या देवी० विष्णु० ॥ नमस्तस्यै नमो नमः ॥ १५ ॥ या देवी० विष्णु० ॥ नमस्तस्यै नमो

नमः ॥ १६ ॥ या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ नम-
स्तस्यै० ॥ १७ ॥ या० चेत० ॥ नमस्तस्यै नमो नमः ॥ १८ ॥
या० चेत० ॥ नमस्तस्यै नमो नमः ॥ १९ ॥ या देवी सर्व-
भूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै० ॥ २० ॥ या०
बुद्धि० ॥ नमस्तस्यै० ॥ २१ ॥ या० बुद्धि० ॥ नमस्तस्यै
नमो० ॥ २२ ॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥
नमस्तस्यै० ॥ २३ ॥ या० निद्रा० ॥ नमस्तस्यै० ॥ २४ ॥
या० निद्रा० ॥ नमस्तस्यै नमो नमः ॥ २५ ॥ या देवी सर्व-
भूतेषु क्षुधारूपेण संस्थिता ॥ नमस्तस्यै० ॥२६॥ या० क्षुधा० ॥

नमस्तस्यै० ॥२७॥ या० क्षुधा० ॥ नमस्तस्यै नमो नमः ॥२८॥ या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥ नमस्तस्यै० ॥ २९ ॥ या० छाया० ॥ नमस्तस्यै० ॥ ३० ॥ या० छाया० ॥ नमस्तस्यै नमो नमः ॥ ३१ ॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ नमस्तस्यै० ॥ ३२ ॥ या० शक्ति० ॥ नमस्तस्यै० ॥३३॥ या० शक्ति० ॥ नमस्तस्यै नमो नमः ॥ ३४ ॥ या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै० ॥ ३५ ॥ या दे० तृष्णा० ॥ नमस्तस्यै० ॥ ३६ ॥ या दे० तृष्णा० ॥ नमस्तस्यै नमो नमः ॥ ३७ ॥ या देवी सर्वभूतेषु क्षांतिरूपेण संस्थिता ॥

नमस्तस्यै० ॥ ३८ ॥ या० क्षांति० ॥ नमस्तस्यै० ॥ ३९ ॥ या० क्षांति० ॥ नमस्तस्यै नमो नमः ॥ ४० ॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥ नमस्तस्यै० ॥ ४१ ॥ या० जाति० ॥ नमस्तस्यै० ॥ ४२ ॥ या० जाति० ॥ नमस्तस्यै नमो नमः ॥ ४३ ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै० ॥ ४४ ॥ या० लज्जा० ॥ नमस्तस्यै० ॥ ४५ ॥ या० लज्जा० ॥ नमस्तस्यै नमो नमः ॥ ४६ ॥ या देवी सर्वभूतेषु शांतिरूपेण संस्थिता ॥ नमस्तस्यै० ॥ ४७ ॥ या० शांति० ॥ नमस्तस्यै० ॥ ४८ ॥

या० शांति० ॥ नमस्तस्यै नमो नमः ॥ ४९ ॥ या देवी सर्व-
भूतेषु श्रद्धारूपेण संस्थिता ॥ नमस्तस्यै० ॥ ५० ॥ या०
श्रद्धा० नमस्तस्यै० ॥ ५१ ॥ या० श्रद्धा० ॥ नमस्तस्यै
नमो नमः ॥५२॥ या देवी सर्वभूतेषु कांतिरूपेण संस्थिता ॥
नमस्तस्यै० ॥ ५३ ॥ या० कांति० ॥ नमस्तस्यै० ॥ ५४ ॥
या० कांति० ॥ नमस्तस्यै नमो नमः ॥ ५५ ॥ या देवी सर्व-
भूतेषु लक्ष्मीरूपेण संस्थिता ॥ नमस्तस्यै० ॥ ५६ ॥ या०
लक्ष्मी० ॥ नमस्तस्यै० ॥ ५७ ॥ या० लक्ष्मी० ॥ नमस्त-
स्यै नमो नमः ॥ ५८ ॥ या देवी सर्वभूतेषु वृत्तिरूपेण सं-

स्थिता ॥ नमस्तस्यै० ॥ ५९ ॥ या० वृत्ति० ॥ नमस्तस्यै० ॥ ॥ ६० ॥ या० वृत्ति० ॥ नमस्तस्यै नमो नमः ॥ ६१ ॥ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥ नमस्तस्यै० ॥६२॥ या० स्मृति० ॥ नमस्तस्यै० ॥६३॥ या० स्मृति० ॥ नमस्तस्यै नमो नमः ॥ ६४ ॥ या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥ नमस्तस्यै० ॥ ६५ ॥ या० दया० ॥ नमस्तस्यै० ॥ ६६ ॥ या० दया० ॥ नमस्तस्यै नमो नमः ॥ ६७ ॥ या देवी सर्व-भूतेषु तुष्टिरूपेण संस्थिता ॥ नमस्तस्यै० ॥ ६८ ॥ या० तुष्टि० ॥ नमस्तस्यै० ॥ ६९ ॥ या० तुष्टि० ॥ नमस्तस्यै नमो

नमः ॥ ७० ॥ या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥ नमस्तस्यै० ॥ ७१ ॥ या० मातृ० ॥ नमस्तस्यै० ॥ ७२ ॥ या० मातृ० ॥ नमस्तस्यै नमो नमः ॥ ७३ ॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥ नमस्तस्यै नमो नमः ॥ ७४ ॥ या देवी० भ्रांति० ॥ नमस्तस्यै नमो नमः ॥ ७५ ॥ या देवी० भ्रांति० ॥ नमस्तस्यै नमो नमः ॥ ७६ ॥ इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥ भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ ७७ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै नमो नमः ॥ ७८ ॥

चितिरूपेण० ॥ नमस्तस्यै नमो नमः ॥ ७९ ॥ चितिरूपेण० ॥ नमस्तस्यै नमो नमः ॥ ८० ॥ स्तुता सुरैः पूर्वमभीष्टसंश्रया-त्तथाऽसुरेंद्रेण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरी-श्वरी शुभानि भद्राण्यभिहंतु चापदः ॥ ८१ ॥ या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ८२ ॥ ऋषिरुवाच ॥ ८३ ॥ एवं स्तवाभियुक्तानां देवानां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जाह्नव्या नृपनंदन ॥ ८४ ॥ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ॥ शरी-

रकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥ ८५ ॥ स्तोत्रं ममै-
तत्क्रियते शुंभदैत्यनिराकृतैः ॥ देवैः समेतैः समरे निशुंभेन
पराजितैः ॥ ८६ ॥ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृता-
म्बिका ॥ कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ ८७ ॥
तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ॥ कालिकेति
समाख्याता हिमालयकृताश्रया ॥ ८८ ॥ ततोऽम्बिकां परं
रूपं बिभ्राणां सुमनोहरम् ॥ ददर्श चण्डो मुण्डश्च भृत्यौ
शुंभनिशुंभयोः ॥ ८९ ॥ ताभ्यां शुंभाय चाख्याता सातीव
सुमनोहरा ॥ काप्यास्ते स्त्री महाराज भासयंती हिमाच-

लम् ॥ ९० ॥ नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥ ९१ ॥ स्त्रीरत्न-मतिचार्वंगी द्योतयंती दिशस्त्विषा ॥ सा तु तिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्हति ॥ ९२ ॥ यानि रत्नानि मणयो गजा-श्वादीनि वै प्रभो ॥ त्रैलोक्ये तु समस्तानि सांप्रतं भांति ते गृहे ॥ ९३ ॥ ऐरावतः समानीतो गजरत्नं पुरन्दरात् ॥ पारि-जाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥ विमानं हंससं-युक्तमेतत्तिष्ठति तेंऽगणे ॥ रत्नभूतमिहानीतं यदासीद्वेधसोद्भु-तम् ॥ ९५ ॥ निधिरेष महापद्मः समानीतो धनेश्वरात् ॥

किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजाम् ॥ ९६ ॥ छत्रं ते वारुणं गेहे कांचनस्रावि तिष्ठति ॥ तथायं स्यंदन-वरो यः पुरासीत्प्रजापतेः ॥ ९७ ॥ मृत्योरुत्क्रांतिदा नाम शक्तिरीश त्वया हृता ॥ पाशः सलिलराजस्य भ्रातुस्तव परि-ग्रहे ॥ ९८ ॥ निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः ॥ वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥ ९९ ॥ एवं दैत्येंद्र रत्नानि समस्तान्याहृतानि ते ॥ स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ १०० ॥ ऋषिरुवाच ॥ १ ॥ निश-म्येति वचः शुंभः स तदा चंडमुंडयोः ॥ प्रेषयामास सुग्रीवं

दूतं देव्या महासुरम् ॥ २ ॥ इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥ यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥ ३ ॥ स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥ तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ ४ ॥ दूत उवाच ॥ ५ ॥ देवि दैत्येश्वरः शुंभस्त्रैलोक्ये परमेश्वरः ॥ दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ ६ ॥ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥ निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥ ७ ॥ मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥ यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ॥ ८ ॥

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥ तथैव गजरत्नं च हृतं देवेंद्रवाहनम् ॥ ९ ॥ क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ॥ उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥ ११० ॥ यानि चान्यानि देवेषु गंधर्वेषूरगेषु च ॥ रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ ११ ॥ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ॥ सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥ १२ ॥ मां वा ममानुजं वापि निशुंभमुरुविक्रमम् ॥ भज त्वं चंचलापांगि रत्नभूतासि वै यतः ॥ १३ ॥ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥ एतद्बुद्ध्या समा-

लोच्य मत्परिग्रहतां व्रज ॥ १४ ॥ ऋषिरुवाच ॥ १५ ॥
इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ ॥ दुर्गा भग-
वती भद्रा यथेदं धार्यते जगत् ॥ १६ ॥ देव्युवाच ॥ १७ ॥
सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ॥ त्रैलोक्या-
धिपतिः शुंभो निशुंभश्चापि तादृशः ॥ १८ ॥ किंत्वत्र यत्प्र-
तिज्ञातं मिथ्या तत्क्रियते कथम् ॥ श्रूयतामल्पबुद्धित्वात्प्र-
तिज्ञा या कृता पुरा ॥ १९ ॥ यो मां जयति संग्रामे यो मे
दर्पं व्यपोहति ॥ यो मे प्रतिबलो लोके स मे भर्ता भवि-
ष्यति ॥ १२० ॥ तदागच्छतु शुंभोऽत्र निशुंभो वा महाबलः ॥

मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ २१ ॥
दूत उवाच ॥ २२ ॥ अवलिप्तासि मैवं त्वं देवि ब्रूहि ममा-
ग्रतः ॥ त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभयोः ॥ २३ ॥
अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥ तिष्ठंति संमुखे
देवि किं पुनः स्त्री त्वमेकिका ॥ २४ ॥ इंद्राद्याः सकला देवा-
स्तस्थुर्येषां न संयुगे ॥ शुंभादीनां कथं तेषां स्त्री प्रयास्यसि
संमुखम् ॥ २५ ॥ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुं-
भयोः ॥ केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥ २६ ॥
देव्युवाच ॥ २७ ॥ एवमेतद्बली शुंभो निशुंभश्चापि तादृशः ॥

किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ २८ ॥
स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ॥ तदाचक्ष्वासुरें-
द्राय स च युक्तं करोतु यत् ॥ १२९ ॥ मार्कंडेयपुराणे साव-
र्णिके मन्वंतरे देवीमाहात्म्ये देव्या दूतसंवादो नाम पंचमः
॥ ५ ॥ उवाच ॥ ९ ॥ त्रिपान्मंत्राः ॥ ६६ ॥ श्लोकमंत्राः ॥
॥ ५४ ॥ एवं ॥ १२९ ॥ एवमादितः ॥ ३८८ ॥ ॥ ॥
ऋषिरुवाच ॥ १ ॥ इत्याकर्ण्य वचो देव्याः स दूतोऽमर्ष-
पूरितः ॥ समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥ २ ॥
तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह

दैत्यानामधिपं धूम्रलोचनम् ॥ ३ ॥ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥ तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥ ४ ॥ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठते परः ॥ स हंतव्योऽमरो वापि यक्षो गंधर्व एव वा ॥ ५ ॥ ऋषिरुवाच ॥ ६ ॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥ वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ७ ॥ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ॥ जगादोच्चैः प्रयाहीति मूलं शुंभनिशुंभयोः ॥ ८ ॥ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ॥ ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥

देव्युवाच ॥ १० ॥ दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥ बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥ ११ ॥ ऋषिरुवाच ॥ १२ ॥ इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ॥ हुंकारेणैव तं भस्म सा चकाराम्बिका तदा ॥ १३ ॥ अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १४ ॥ ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ॥ पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ १५ ॥ कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥ आक्रांत्या चाधरेणान्यान्जघान स महासुरान् ॥ १६ ॥ केषां-

च्चित्पाटयामास नखैः कोष्ठानि केसरी ॥ तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥ १७ ॥ विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ॥ पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥ १८ ॥ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥ तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ १९ ॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ॥ बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥ २० ॥ चुकोप दैत्याधिपतिः शुंभः प्रस्फुरिताधरः ॥ आज्ञापयामास च तौ चंडमुंडौ महासुरौ ॥ २१ ॥ हे चंड हे मुंड बलैर्बहुभिः परिवारितौ ॥ तत्र गच्छत गत्वा

च सा समानीयतां लघु ॥ २२ ॥ केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ॥ तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ २३ ॥ तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ॥ शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथांबिकाम् ॥ २४ ॥ मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये षष्ठः ॥ ६ ॥ उवाच ॥ ४ ॥ अर्ध ॥ ० ॥ श्लोकमंत्राः ॥ २० ॥ एवं ॥ २४ ॥ एवमादितः ॥ ४१२ ॥ ॥ ॥ ॥ ॥

ऋषिरुवाच ॥ १ ॥ आज्ञप्तास्ते ततो दैत्याश्चंडमुंडपुरोगमाः ॥ चतुरंगवलोपेता ययुरभ्युद्यतायुधाः ॥ २ ॥ ददृशुस्ते ततो

देवीमीषद्धासां व्यवस्थिताम् ॥ सिंहस्योपरि शैलेंद्रशृंगे महति कांचने ॥ ३ ॥ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥ आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥ ४ ॥ ततः कोपं चकारोच्चैरंबिका तानरीन्प्रति ॥ कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥ ५ ॥ भ्रूकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ॥ काली करालवदना विनिष्क्रांतासिपाशिनी ॥ ६ ॥ विचित्रखट्वांगधरा नरमालाविभूषणा ॥ द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥ ७ ॥ अतिविस्तारवदना जिह्वाललनभीषणा ॥ निमग्ना रक्तनयना नादापूरितदि-

श्रुखा ॥ ८ ॥ सा वेगेनाभिपतिता घातयन्ती महासुरान् ॥ सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥ ९ ॥ पार्ष्णिग्राहां-कुशग्राहयोधघंटासमन्वितान् ॥ समादायैकहस्तेन मुखे चि-क्षेप वारणात् ॥ १० ॥ तथैव योधं तुरगै रथं सारथिना सह ॥ निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभैरवम् ॥ ११ ॥ एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥ पादेनाक्रम्य चैवान्य-मुरसान्यमपोथयत् ॥ १२ ॥ तैर्मुक्तानि च शस्त्राणि महा-स्त्राणि तथासुरैः ॥ मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ १३ ॥ बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ॥ ममर्दा-

भक्षयन्त्वान्यानन्यांश्चाताडयत्तदा ॥ १४ ॥ असिना निहताः केचित्केचित्खट्वांगताडिताः ॥ जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा ॥ १५ ॥ क्षणेन तद्बलं सर्वमसुराणां निपातितम् ॥ दृष्ट्वा चंडोऽभिदुद्राव तां कालीमतिभीषणाम् ॥ १६ ॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥ छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः ॥ १७ ॥ तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ॥ बभुर्यथार्कबिंबानि सुबहूनि घनोदरम् ॥ १८ ॥ ततो जहासातिरुषा भीमं भैरवनादिनी ॥ काली करालवदना दुर्दर्शदशनोज्ज्वला ॥ १९ ॥ उत्थाय च महा-

सिंहं देवी चंडमधावत ॥ गृहीत्वा चास्य केशेषु शिरस्तेना-
सिनाच्छिनत् ॥ २० ॥ अथ मुंडोऽभ्यधावत्तां दृष्ट्वा चंडं
निपातितम् ॥ तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा
॥ २१ ॥ हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितम् ॥
मुंडं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२ ॥ शिर-
श्चंडस्य काली च गृहीत्वा मुण्डमेव च ॥ प्राह प्रचंडाट्टहा-
समिश्रमभ्येत्य चंडिकाम् ॥ २३ ॥ मया तवात्रोपहृतौ चण्ड-
मुण्डौ महापशू ॥ युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि
॥ २४ ॥ ऋषिरुवाच ॥ २५ ॥ तावानीतौ ततो दृष्ट्वा चंडमुंडौ म-

हासुरौ ॥ उवाच कालीं कल्याणी ललितं चंडिका वचः ॥ २६ ॥
यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता ॥ चामुंडेति ततो
लोके ख्याता देवी भविष्यसि ॥ २७ ॥ मार्कण्डेयपुराणे साव-
र्णिके मन्वंतरे देवीमाहात्म्ये सप्तमः ॥ ७ ॥ उवाच ॥ २ ॥
श्लोकाः ॥ २५ ॥ एवं ॥ २७ ॥ एवमादितः ॥ ४३९ ॥ ॥
ऋषिरुवाच ॥ १ ॥ चंडे च निहते दैत्ये मुण्डे च विनिपा-
तिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ २ ॥ ततः
कोपपराधीनचेताः शुम्भः प्रतापवान् ॥ उद्योगं सर्वसैन्यानां
दैत्यानामादिदेश ह ॥ ३ ॥ अद्य सर्वबलैर्दैत्याः षडशीतिरु-

दायुधाः ॥ कंबूनां चतुराशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ४ ॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥ ५ ॥ कालका दौर्हृदा मौर्याः कालिकेयास्तथाऽसुराः ॥ युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम ॥ ६ ॥ इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ॥ निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥ ७ ॥ आयांतं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ॥ ज्यास्वनैः पूरयामास धरणीगगनांतरम् ॥ ८ ॥ ततः सिंहो महानादमतीव कृतवान्नृप ॥ घण्टास्वनेन तान्नादानंबिका चोपबृंहयत् ॥ ९ ॥ धनु-

ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ॥ निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥ १० ॥ तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥ देवीसिंहस्तथा काली सरोषैः परिवारिताः ॥ ११ ॥ एतस्मिन्नंतरे भूप विनाशाय सुरद्विषाम् ॥ भवायामरसिंहानामतिवीर्यबलान्विताः ॥ १२ ॥ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः ॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १३ ॥ यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥ १४ ॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥ आयाता

ब्रह्मणः शक्तिर्ब्रह्माणीत्यभिधीयते ॥ १५ ॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥ महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥ १६ ॥ कौमारी शक्तिहस्ता च मयूरवरवाहना ॥ योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी ॥ १७ ॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥ १८ ॥ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ॥ शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥ १९ ॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥ प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥ २० ॥ वज्रहस्ता तथैवैंद्री गजराजोपरि

स्थिता ॥ प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥ २१ ॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥ हन्यतामसुराः
शीघ्रं मम प्रीत्याह चंडिकाम् ॥ २२ ॥ ततो देवीशरीरात्तु
विनिष्क्रांतातिभीषणा ॥ चंडिकाशक्तिरत्युग्रा शिवाशतनि-
नादिनी ॥ २३ ॥ सा चाह धूम्रजटिलमीशानमपराजिता ॥
दूत त्वं गच्छ भगवन्पार्श्वं शुंभनिशुंभयोः ॥ २४ ॥ ब्रूहि
शुंभं निशुंभं च दानवावतिगर्वितौ ॥ ये चान्ये दानवास्तत्र
युद्धाय समुपस्थिताः ॥ २५ ॥ त्रैलोक्यमिंद्रो लभतां देवाः
संतु हविर्भुजः ॥ यूयं प्रयात पातालं यदि जीवितुमिच्छथ

॥ २६ ॥ बलावलोपादथ चेद्भवंतो युद्धकांक्षिणः ॥ तदाग-
च्छत तृप्यंतु मच्छिवाः पिशितेन वः ॥ २७ ॥ यतो नियुक्तो
दौत्येन तया देव्या शिवः स्वयम् ॥ शिवदूतीति लोके-
स्मिंस्ततः सा ख्यातिमागता ॥ २८ ॥ तेपि श्रुत्वा वचो
देव्याः शर्वाख्यातं महासुराः ॥ अमर्षापूरिता जग्मुर्यत्र कात्या-
यनी स्थिता ॥ २९ ॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृ-
ष्टिभिः ॥ ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥ ३० ॥ सा च
तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् ॥ चिच्छेद लीलया-
ध्मातधनुर्मुक्तैर्महेषुभिः ॥ ३१ ॥ तस्याग्रतस्तथा काली शूल-

पातविदारितान् ॥ खट्वांगपोथितांश्चारीन् कुर्वंती व्यचरत्त-
दा ॥ ३२ ॥ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ॥ ब्रह्माणी
चाऽकरोच्छत्रून्येन येन स्म धावति ॥ ३३ ॥ माहेश्वरी त्रि-
शूलेन तथा चक्रेण वैष्णवी । दैत्याञ्जघान कौमारी तथा
शक्त्यातिकोपना ॥ ३४ ॥ ऐंद्रीकुलिशपातेन शतशो दैत्य-
दानवाः ॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ ३५ ॥
तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥ वाराहमूर्त्या न्यपतं-
श्चक्रेण च विदारिताः ॥ ३६ ॥ नखैर्विदारितांश्चान्यान्भक्ष-
यंती महासुरान् ॥ नारसिंही चचाराजौ नादापूर्णदिगंबरा

॥ ३७ ॥ चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥ पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥ ३८ ॥ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् ॥ दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥ पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ४० ॥ रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीरतः ॥ समुत्पतति मेदिन्यां तत्प्रमाणो महासुरः ॥ ४१ ॥ युयुधे स गदापाणिरिंद्रशक्त्या महासुरः ॥ ततश्चैंद्री स्ववज्रेण रक्तबीजमताडयत् ॥ ४२ ॥ कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ॥ समु-

त्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥ ४३ ॥ यावंतः पतितास्तस्य शरीराद्रक्तबिंदवः ॥ तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ ४४ ॥ ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥ समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥ ४५ ॥ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥ ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ४६ ॥ वैष्णवी समरे चैनं चक्रेणाभिजघान ह ॥ गदया ताडयामास ऐंद्री तमसुरेश्वरम् ॥ ४७ ॥ वैष्णवी चक्रभिन्नस्य रुधिरस्रावसंभवैः ॥ सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४८ ॥ शक्त्या जघान कौमारी वाराही

च तथासिना ॥ माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥४९॥ स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् ॥ मातृः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ५० ॥ तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ॥ पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥ ५१ ॥ तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् ॥ व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ ५२ ॥ तान्विषण्णान्सुरान्दृष्ट्वा चंडिका प्राह सत्वरम् ॥ उवाच कालीं चामुंडे विस्तीर्णं वदनं कुरु ॥ ५३ ॥ मच्छस्त्रपातसंभूतान् रक्तबिंदून्महासुरान् ॥ रक्तबिंदोः प्रतीच्छ त्वं वक्त्रेणानेन वे-

गिना ॥ ५४ ॥ भक्षयंती चर रणे तदुत्पन्नान्महासुरान् ॥ एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५५ ॥ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यंति चापरे ॥ इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥ ५६ ॥ मुखेन काली जगृहे रक्तबीजस्य शोणितम् ॥ ५७ ॥ ततोऽसावाजघानाथ गदया तत्र चंडिकाम् ॥ न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ॥ ॥ ५८ ॥ तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥ यतस्ततस्तद्वक्त्रेण चामुंडा संप्रतीच्छति ॥ ५९ ॥ मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥ तांश्चखादाथ चामुंडा पपौ तस्य

च शोणितम् ॥ ६० ॥ देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥ जघान रक्तबीजं तं चामुंडापीतशोणितम् ॥ ६१ ॥ स पपात महीपृष्ठे शस्त्रसंघसमाहतः ॥ नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ६२ ॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥ तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ ६३ ॥ मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये अष्टमः ॥८॥ उवाच ॥ १ ॥ अर्धं ॥ १ ॥ श्लोकाः ॥ ६१ ॥ एवं ॥ ६३ ॥ एवमादितः ॥ ५०२ ॥ ॥ ॥

राजोवाच ॥ १ ॥ विचित्रमिदमाख्यातं भगवन्भवता मम ॥

देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ २ ॥ भूयश्चे-
च्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥ चकार शुंभो यत्कर्म
निशुंभश्चातिकोपनः ॥ ३ ॥ ऋषिरुवाच ॥ ४ ॥ चकार कोप-
मतुलं रक्तबीजे निपातिते ॥ शुंभासुरो निशुंभश्च हतेष्व-
न्येषु चाहवे ॥ ५ ॥ हन्यमानं महासैन्यं विलोक्यामर्षमुद्व-
हन् ॥ अभ्यधावन्निशुंभोऽथ मुख्ययाऽसुरसेनया ॥६॥ तस्या-
ग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥ संदष्टौष्ठपुटाः क्रुद्धा हंतुं
देवीमुपाययुः ॥ ७ ॥ आजगाम महावीर्यः शुंभोऽपि स्वब-
लैर्वृतः ॥ निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥

॥ ८ ॥ ततो युद्धमतीवासीद्देव्याः शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥ ९ ॥ चिच्छेदास्ताञ्छरांस्ताभ्यां चंडिका स्वशरोत्करैः ॥ ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ ॥ १० ॥ निशुंभो निशितं खड्गं चर्म चादाय सुप्रभम् ॥ अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥ ११ ॥ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ॥ निशुंभस्याशु चिच्छेद चर्म चाप्यष्टचंद्रकम् ॥ १२ ॥ छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ॥ तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥ १३ ॥ कोपाध्मातो निशुंभोऽथ शूलं जग्राह दा-

नवः ॥ आयांतं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १४ ॥
आविध्याथ गदां सोपि चिक्षेप चंडिकां प्रति ॥ सापि देव्या-
स्त्रिशूलेन भिन्ना भस्मत्वमागता ॥ १५ ॥ ततः परशुहस्तं
तमायांतं दैत्यपुंगवम् ॥ आहत्य देवी बाणौघैरपातयत
भूतले ॥ १६ ॥ तस्मिन्निपतिते भूमौ निशुंभे भीमविक्रमे ॥
भ्रातर्यतीव संक्रुद्धः प्रययौ हंतुमंबिकाम् ॥ १७ ॥ स रथ-
स्थस्तथात्युच्चैर्गृहीतपरमायुधैः ॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषं
बभौ नभः ॥ १८ ॥ तमायांतं समालोक्य देवी शंखमवाद-
यत् ॥ ज्याशब्दं चापि धनुषश्चकारातीव दुस्सहम् ॥ १९ ॥

पूरयामास ककुभो निजघंटास्वनेन च ॥ समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥ २० ॥ ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥ पूरयामास गगनं गां तथैव दिशो दश ॥ २१ ॥ ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ॥ कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥२२॥ अट्टाट्टहासमशिवं शिवदूती चकार ह ॥ तैः शब्दैरसुरास्त्रेसुः शुंभः कोपं परं ययौ ॥ २३ ॥ दुरात्मंस्तिष्ठ तिष्ठेति व्याजहारांबिका यदा ॥ तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥ २४ ॥ शुंभेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ॥ आयांती वह्निकू-

टाभा सा निरस्ता महोल्कया ॥ २५ ॥ सिंहनादेन शुंभस्य व्याप्तं लोकत्रयान्तरम् ॥ निर्घातनिःस्वनो घोरो जितवानवनीपते ॥ २६ ॥ शुंभमुक्ताञ्छरान्देवी शुंभस्तत्प्रहिताञ्छरान् ॥ चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥ २७ ॥ ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ॥ स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥ २८ ॥ ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः ॥ आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ २९ ॥ पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ॥ चक्रायुधेन दितिजश्छादयामास चंडिकाम् ॥ ३० ॥

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥ चिच्छेद देवी चक्राणि स्वशरैः सायकांश्च तान् ॥ ३१ ॥ ततो निशुंभो वेगेन गदामादाय चंडिकाम् ॥ अभ्यधावत वै हंतुं दैत्यसैन्यसमावृतः ॥ ३२ ॥ तस्यापतत एवाशु गदां चिच्छेद चंडिका ॥ खड्गेन शितधारेण स च शूलं समाददे ॥ ३३ ॥ शूलहस्तं समायांतं निशुंभममरार्दनम् ॥ हृदि विव्याध शूलेन वेगाविद्धेन चंडिका ॥ ३४ ॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ॥ महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३५ ॥ तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥

शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥ ३६ ॥ ततः सिंह-श्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३७ ॥ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥ ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः ॥ ३८ ॥ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ॥ वाराही-तुंडघातेन केचिच्चूर्णीकृता भुवि ॥ ३९ ॥ खंडं खंडं च चक्रेण वैष्णव्या दानवाः कृताः ॥ वज्रेण चैंद्रीहस्ताग्र-विमुक्तेन तथापरे ॥ ४० ॥ केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ॥ भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ ४१ ॥

मार्कंण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये नवमः ॥ ९ ॥ उवाच ॥ २ ॥ श्लोकाः ॥ ३९ ॥ एवं ॥ ४१ ॥ एवमादितः ॥ ५४३ ॥

ऋषिरुवाच ॥ १ ॥ निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् ॥ हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः ॥ २ ॥ बलावलेपदुष्टे त्वं मा दुर्गे गर्वमावह ॥ अन्यासां बलमाश्रित्य युध्यसे चातिमानिनी ॥ ३ ॥ देव्युवाच ॥ ४ ॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥ पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः ॥ ५ ॥ ततः समस्तास्ता देव्यो ब्रह्माणी-

प्रमुखा लयम् ॥ तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ॥ ६ ॥ देव्युवाच ॥ ७ ॥ अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ॥ तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ८ ॥ ऋषिरुवाच ॥ ९ ॥ ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः ॥ पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥ १० ॥ शरवर्षैः शितैः शस्त्रैस्तथा चास्त्रैः सुदारुणैः ॥ तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ॥ ११ ॥ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका ॥ बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ॥ १२ ॥ मुक्तानि तेन चास्त्राणि

दिव्यानि परमेश्वरी ॥ बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः ॥ १३ ॥ ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥ सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १४ ॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥ चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ १५ ॥ ततः खड्गमुपादाय शतचंद्रं च भानुमत् ॥ अभ्यधावत तां देवीं दैत्यानामधिपेश्वरः ॥ १६ ॥ तस्यापतत एवाशु खड्गं चिच्छेद चंडिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥ १७ ॥ अश्वांश्च पातयामास रथं सारथिना सह ॥ हताश्वः स तदा दैत्यश्छि-

न्नधन्वा विसारथिः ॥ १८ ॥ जग्राह मुद्गरं घोरमंबिकानिध-
नोद्यतः ॥ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥ १९ ॥
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥ स मुष्टिं पात-
यामास हृदये दैत्यपुंगवः ॥ २० ॥ देव्यास्तं चापि सा देवी
तलेनोरस्यताडयत् ॥ तलप्रहाराभिहतो निपपात महीतले
॥ २१ ॥ स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ उत्पत्य
च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥ २२ ॥ तत्रापि सा निरा-
धारा युयुधे तेन चंडिका ॥ २३ ॥ नियुद्धं खे तदा दैत्य-
श्चंडिका च परस्परम् ॥ चक्रतुः प्रथमं सिद्धमुनिविस्मय-

कारकम् ॥ २४ ॥ ततो नियुद्धं सुचिरं कृत्वा तेनांबिका सह ॥ उत्पाट्य भ्रामयामास चिक्षेप धरणीतले ॥ २५ ॥ स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगवान् ॥ अभ्यधावत दुष्टात्मा चंडिकानिधनेच्छया ॥ २६ ॥ तमायांतं ततो देवी सर्वदैत्यजनेश्वरम् ॥ जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥ २७ ॥ स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ॥ चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥ २८ ॥ ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ॥ जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥ २९ ॥ उत्पातमेघाः सोल्का ये प्रागा-

संस्ते शमं ययुः ॥ सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥ ३० ॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥ बभूवुर्निहते तस्मिन् गंधर्वा ललितं जगुः ॥ ३१ ॥ अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ ३२ ॥ मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये दशमः ॥ १० ॥ उवाच ॥ ४ ॥ अर्धं ॥ ॥१॥ श्लोकमंत्राः ॥ २७ ॥ एवं ॥ ३२ ॥ एवमादितः ॥५७५॥ ऋषिरुवाच ॥१॥ देव्या हते तत्र महासुरेंद्रे सेंद्राः सुरा वह्निपुरोगमास्ताम् ॥ कात्यायनीं तुष्टुवुरिष्टलाभाद्विकाशिवक्त्राब्ज-

विकासिताशाः ॥ २ ॥ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥ प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥३॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ॥ अपांस्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ॥ ४ ॥ त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया ॥ संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥ विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ॥ त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्यपरा परोक्तिः ॥ ६ ॥ सर्वभूता यदा देवि

भुक्तिमुक्तिप्रदायिनि ॥ त्वं स्तुता स्तुतये का वा भवंतु परमोक्तयः ॥ ७ ॥ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥ स्वर्गापवर्गदे देवि नारायणि नमोस्तु ते ॥ ८ ॥ कलाकाष्ठादिरूपेण परिणामप्रदायिनि ॥ विश्वस्योपरतौ शक्ते नारायणि नमोस्तु ते ॥ ९ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते ॥ १० ॥ सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ॥ गुणाश्रये गुणमये नारायणि नमोस्तु ते ॥ ११ ॥ शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते ॥ १२ ॥

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥ कौशांभःक्षरिके देवि नारायणि नमोस्तु ते ॥ १३ ॥ त्रिशूलचंद्राहिधरे महावृषभवाहिनि ॥ माहेश्वरीस्वरूपेण नारायणि नमोस्तु ते ॥ १४ ॥ मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ॥ कौमारी-रूपसंस्थाने नारायणि नमोस्तु ते ॥ १५ ॥ शंखचक्रगदा-शार्ङ्गगृहीतपरमायुधे ॥ प्रसीद वैष्णवीरूपे नारायणि नमोस्तु ते ॥ १६ ॥ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ॥ वराहरू-पिणि शिवे नारायणि नमोस्तुं ते ॥ १७ ॥ नृसिंहरूपेणो-ग्रेण हंतुं दैत्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणसहिते नारायणि

नमोस्तु ते ॥ १८ ॥ किरीटिनि महावज्रे सहस्रनयनो-
ज्ज्वले ॥ वृत्रप्राणहरे चैंद्रि नारायणि नमोस्तु ते ॥ १९ ॥
शिवदूतीस्वरूपेण हतदैत्यमहाबले ॥ घोररूपे महारावे
नारायणि नमोस्तु ते ॥ २० ॥ दंष्ट्राकरालवदने शिरोमाला-
विभूषणे ॥ चामुंडे मुंडमथने नारायणि नमोस्तु ते ॥ २१ ॥
लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ॥ महारात्रि
महामाये नारायणि नमोस्तु ते ॥ २२ ॥ मेधे सरस्वति वरे
भूति बाभ्रवि तामसि ॥ नियते त्वं प्रसीदेशे नारायणि
नमोस्तु ते ॥ २३ ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥

भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ २४ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥ पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते ॥ २५ ॥ ज्वालाकरालमत्युग्रमशेषा-सुरसूदनम् ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते ॥ २६ ॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव ॥ २७ ॥ असु-रासृग्वसापंकचर्चितस्ते करोज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयम् ॥२८॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् ॥ त्वामाश्रितानां न विपन्नराणां

त्वामाश्रिता ह्याश्रयतां प्रयांति ॥ २९ ॥ एतत्कृतं यत्क-
दनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ॥ रूपैरनेकैर्बहु-
धात्ममूर्तिं कृत्वाऽम्बिके तत् प्रकरोति कान्या ॥ ३० ॥
विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥
ममत्वगर्तेऽतिमहांधकारे विभ्रामयस्येतदतीव विश्वम् ॥ ३१ ॥
रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥
दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि
विश्वम् ॥ ३२ ॥ विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका
धारयसीह विश्वम् ॥ विश्वेशवंद्या भवती भवन्ति विश्वाश्रया

ये त्वयि भक्तिनम्राः ॥ ३३ ॥ देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथाऽसुरवधादधुनैव सद्यः ॥ पापानि सर्व-जगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥ ३४ ॥ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥ त्रैलो-क्यवासिनामीड्ये लोकानां वरदा भव ॥ ३५ ॥ देव्युवाच ॥ ३६ ॥ वरदाहं सुरगणा वरं यं मनसेच्छथ ॥ तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥ ३७ ॥ देवा ऊचुः ॥ ३८ ॥ सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥ एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥ ३९ ॥ देव्युवाच ॥ ४० ॥

वैवस्वतेंऽतरे प्राप्ते अष्टाविंशतिमे युगे ॥ शुंभो निशुंभश्चैवा-
न्यावुत्पत्स्येते महासुरौ ॥ ४१ ॥ नंदगोपगृहे जाता यशो-
दागर्भसंभवा ॥ ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी
॥ ४२ ॥ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य
हनिष्यामि वैप्रचित्तांश्च दानवान् ॥ ४३ ॥ भक्षयंत्याश्च
तानुग्रान् वैप्रचित्तान्महासुरान् ॥ रक्ता दंता भविष्यंति
दाडिमीकुसुमोपमाः ॥ ४४ ॥ ततो मां देवताः स्वर्गे मर्त्य-
लोके च मानवाः ॥ स्तुवंतो व्याहरिष्यंति सततं रक्तदंति-
काम् ॥ ४५ ॥ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि ॥

मुनिभिः संस्मृता भूमौ संभविष्याम्ययोनिजा ॥ ४६ ॥ ततः शतेन नेत्राणां निरीक्षिष्याम्यहं मुनीन् ॥ कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ॥ ४७ ॥ ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥ भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४८ ॥ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि ॥ ४९ ॥ तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥ दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ॥ ५० ॥ पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥ ५१ ॥ तदा मां

मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥ भीमादेवीति विख्यातं तन्मे नाम भविष्यति ॥ ५२ ॥ यदारुणाख्यस्त्रैलोक्ये महा-बाधां करिष्यति ॥ तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्प-दम् ॥ ५३ ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥ भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ ५४ ॥ इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ तदा तदा-वतीर्याहं करिष्याम्यरिसंक्षयम् ॥ ५५ ॥ मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये नारायणीस्तुतिरेकादशः ॥ ॥ ११ ॥ उवाच ॥ ४ ॥ अर्धमंत्रः ॥ १ ॥ श्लोकमंत्राः ॥५०॥

एवं ॥ ५५ ॥ एवमादितः ॥ ६३० ॥ ॥ ७ ॥ ॥
देव्युवाच ॥ १ ॥ एभिः स्तवैश्च मां नित्यं तोष्यते यः समा-
हितः ॥ तस्याहं सकलां बाधां शमयिष्याम्यसंशयम् ॥ २ ॥
मधुकैटभनाशं च महिषासुरघातनम् ॥ कीर्तयिष्यंति ये
तद्वद्वधं शुंभनिशुंभयोः ॥ ३ ॥ अष्टम्यां च चतुर्दश्यां नवम्यां
चैकचेतसः ॥ श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्त-
मम् ॥ ४ ॥ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥ शत्रुभ्यो
न भयं तस्य दस्युतो वा न राजतः ॥ न शस्त्रानलतोयौ-

घात्कदाचित्संभविष्यति ॥ ६ ॥ तस्मान्ममैतन्माहात्म्यं पठि-
तव्यं समाहितैः ॥ श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं
महत् ॥ ७ ॥ उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥ तथा
त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ८ ॥ यत्रैतत्पठ्यते
सम्यङ् नित्यमायतने मम ॥ सदा न तद्विमोक्ष्यामि सांनिध्यं
तत्र मे स्थितम् ॥ ९ ॥ बलिप्रदाने पूजायामग्निकार्ये महो-
त्सवे ॥ सर्वं ममैतन्माहात्म्यमुच्चार्यं श्राव्यमेव च ॥ १० ॥
जानताजानता वापि बलिपूजां यथाकृताम् ॥ प्रतीक्षिष्या-
म्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥ ११ ॥ शरत्काले महा-

पूजा क्रियते या च वार्षिकी ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ १२ ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः ॥ मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १३ ॥ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ॥ पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १४ ॥ रिपवः संक्षयं यांति कल्याणं चोपपद्यते ॥ नंदते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १५ ॥ शांतिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १६ ॥ उपसर्गाः शमं यांति ग्रहपीडाश्च दारुणाः ॥ दुःस्वप्नं

च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥ बालग्रहाभिभूतानां बालानां शांतिकारकम् ॥ संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ १८ ॥ दुर्वृत्तानामशेषाणां बलहानिकरं परम् ॥ रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥ १९ ॥ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ॥ २० ॥ पशुपुष्पार्घधूपैश्च गंधदीपैस्तथोत्तमैः ॥ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ॥ २१ ॥ अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ प्रीतिर्मे क्रियते सास्मिन् सकृदुच्चरिते श्रुते ॥ २२ ॥ श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ रक्षां करोति

भूतेभ्यो जन्मनां कीर्तनं मम ॥ २३ ॥ युद्धेषु चरितं यन्मे दुष्टदैत्यनिवर्हणम् ॥ तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते ॥ २४ ॥ युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ ब्रह्मणा च कृतास्तास्तु प्रयच्छंतु शुभां मतिम् ॥ २५ ॥ अरण्ये प्रांतरे वापि दावाग्निपरिवारितः ॥ दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ॥ २६ ॥ सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बंधगतोपि वा ॥ २७ ॥ आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ॥ २८ ॥

सर्वाबाधासु घोरासु वेदनाभ्यर्दितोपि वा ॥ स्मरन्ममैतच्च-
रितं नरो मुच्येत संकटात् ॥ २९ ॥ मम प्रभावात्सिंहाद्या
दस्यवो वैरिणस्तथा ॥ दूरादेव पलायंते स्मरतश्चरितं मम
॥ ३० ॥ ऋषिरुवाच ॥ ३१ ॥ इत्युक्त्वा सा भगवती चंडिका
चंडविक्रमा ॥ पश्यतां सर्वदेवानां तत्रैवांतरधीयत ॥ ३२ ॥
तेपि देवा निरातंकाः स्वाधिकारान्यथा पुरा ॥ यज्ञभाग-
भुजः सर्वे चक्रुर्विनिहतारयः ॥ ३३ ॥ दैत्याश्च देव्या निहते
शुंभे देवरिपौ युधि ॥ जगद्विध्वंसके तस्मिन् महोग्रेऽतुलवि-
क्रमे ॥३४॥ निशुंभे च महावीर्ये शेषाः पातालमाययुः ॥३५॥

एवं भगवती देवी सा नित्यापि पुनः पुनः । संभूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥ तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥ सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३७ ॥ व्याप्तं तयैतत्सकलं ब्रह्मांडं मनुजेश्वर ॥ महादेव्या महाकालीमहामारीस्वरूपया ॥ ३८ ॥ सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥ स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९ ॥ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥ सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ॥ ४० ॥ स्तुता संपूजिता पुष्पैर्गंधधूपादिभिस्तथा ॥ ददाति वित्तं

पुत्रांश्च मतिं धर्मे तथा शुभाम् ॥ ४१ ॥ मार्कंडेयपुराणे साव-
र्णिके मन्वंतरे देव्याश्चरितमाहात्म्यं भगवतीवाक्यं द्वादशः ॥
॥ १२ ॥ उवाच ॥ २ ॥ अर्ध ॥ २ ॥ श्लोक ॥ ३७ ॥ एवं
॥ ४१ ॥ एवमादितः ॥ ६७१ ॥ ॥ ॥ ॥
ऋषिरुवाच ॥ १ ॥ एतत्ते कथितं भूप देवीमाहात्म्यमुत्त-
मम् ॥ २ ॥ एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥ विद्या
तथैव क्रियते भगवद्विष्णुमायया ॥ ३ ॥ तया त्वमेष वैश्यश्च
तथैवान्ये विवेकिनः ॥ मोह्यंते मोहिताश्चैव मोहमेष्यंति
चापरे ॥ ४ ॥ तामुपैहि महाराज शरणं परमेश्वरीम् ॥ आरा-

धिता सैव नृणां भोगस्वर्गापवर्गदा ॥५॥ मार्कंडेय उवाच ॥६॥
इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥ प्रणिपत्य महा-
भागं तमृषिं संशितव्रतम् ॥ ७ ॥ निर्विण्णोऽतिममत्वेन
राज्यापहरणेन च ॥ जगाम सद्यस्तपसे स च वैश्यो महा-
मुने ॥ ८ ॥ संदर्शनार्थमंबाया नदीपुलिनमास्थितः ॥ स च
वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ ९ ॥ तौ तस्मिन्पुलिने
देव्याः कृत्वा मूर्तिं महीमयीम् ॥ अर्हणां चक्रतुस्तस्याः पुष्प-
धूपाग्नितर्पणैः ॥ १० ॥ निराहारौ यतात्मानौ तन्मनस्कौ
समाहितौ ॥ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥ ११ ॥

एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥ १२ ॥ देव्युवाच ॥ १३ ॥ यत्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन ॥ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि ते ॥ १४ ॥ मार्कंडेय उवाच ॥ १५ ॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥ अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ १६ ॥ सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥ ममेत्यहमिति प्राज्ञः संगविच्युतिकारकम् ॥१७॥ देव्युवाच ॥ १८ ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ १९ ॥ हत्वा रिपूनस्खलितं तव तत्र भविष्यति

॥ २० ॥ मृतस्य भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ २१ ॥ सावर्णिको मनुर्नाम भवान् भुवि भविष्यति ॥ २२ ॥ वैश्य-वर्य त्वया यश्च वरोऽस्मत्तोभिवांच्छितः ॥ २३ ॥ तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥२४॥ मार्कंडेय उवाच ॥२५॥ इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ॥ बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ २६ ॥ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ २७ ॥ पुनः ॥ इति दत्त्वा तयो० ॥ २८ ॥ पुनः ॥ इति दत्त्वा तयो० ॥ २९ ॥ क्लींॐ श्रीमार्कंडेयपुराणे साव-

णिके मन्वंतरे देवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशः ॥ १३ ॥ उवाचमंत्राः ॥ ६ ॥ अर्धमंत्राः ॥ ७ ॥ श्लोकमंत्राः ॥ १६ ॥ एवं ॥ २९ ॥ एवमादितः ॥ ७०० ॥ अथोत्तरन्यासाः ॥ ॐह्रींहृदयाय नमः ॐचंशिरसे० ॐडिंशिखायै० ॐकांकव० ॐयैंनेत्रत्र० ॐह्रींचंडिकायै अस्त्राय० ॥ ॐखड्गिनी शूलिनी घोरा० हृदयाय नमः ॥ शूलेन पाहि नो देवि० शिरसे स्वाहा ॥ प्राच्यां रक्ष प्रतीच्यां च० शिखायै वषट् ॥ सौम्यानि यानि रूपाणि० कवचाय हुं ॥ खड्गशूलगदादीनि० नेत्रत्रयाय वौषट् ॥ सर्वस्वरूपे सर्वेशे० अस्त्राय फट् ॥

अथ ध्यानम् ॥ विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रदरालिखेटविशिखांश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

अथ वैदिकं देवीसूक्तम् ॥

ॐअहं रुद्रेभिरित्यष्टर्चस्य सूक्तस्य वागांभृणी ऋषिः ॥ श्रीआदिशक्तिर्देवता त्रिष्टुप्छंदः द्वितीया जगती श्रीजगदंबाप्रीत्यर्थे सप्तशतीजपांते जपे विनियोगः ॥ ॐअ॒हंरु॒द्रेभि॒र्वसु॑

भिश्चराम्यहमादित्यैरुतविश्वदेवैः ॥ अहंमित्रावरुणोभाबि-
भर्म्यहमिंद्राग्नीअहमश्विनोभा ॥ अहंसोमंमाहनसंबिभर्म्यहं
त्वष्टारमुतपूषणंभगं ॥ अहंदधामिद्रविणंहविष्मतेसुप्राव्येइ
यजमानायसुन्वते ॥ अहंराष्ट्रींसंगमनीवसूनांचिकितुषींप्रथ
मायज्ञियानां ॥ तांमादेवाव्यंदधुःपुरुत्राभूरिस्थात्रांभूर्यावेश-
यंतीं ॥ मयासोअन्नमत्तियोविपश्यतियःप्राणितियईशृणो-
त्युक्तं ॥ अमंतवोमांतउपक्षियंतिश्रुधिश्रुतश्रद्धिवंतेवदामि ॥
अहमेवस्वयमिदंवदामिजुष्टंदेवेभिरुतमानुषेभिः ॥ यंकामये

तंतंमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधां ॥ १ ॥ अहंरुद्रायधनु-
रातनोमिब्रह्मद्विषेशरवेहंतवाऽउं ॥ अहंजनायसमदंकृणो-
म्यहंद्यावापृथिवीआविवेश ॥ अहंसुवेपितरमस्यमूर्धन्ममयो-
निरप्स्वं१तःसमुद्रे ॥ ततोवितिष्ठेभुवनानिविश्वोतामूंद्यांवर्ष्म-
णोपस्पृशामि ॥ अहमेववातइवप्रवाम्यारभमाणाभुवनानि
विश्वा ॥ परोदिवापरएनापृथिव्यैतावतीमहिनासंबभूव ॥२॥

अथ तांत्रिकं देवीसूक्तम् ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै

भद्रायै नियताः प्रणताः स्म तां ॥ १ ॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥ ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ॥ २ ॥ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ३ ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ ४ ॥ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ५ ॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६ ॥ या देवी

सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७ ॥ या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ८ ॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ९ ॥ या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १० ॥ या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ११ ॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२ ॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १३ ॥ या देवी सर्वभूतेषु क्षांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १४ ॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १५ ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १६ ॥ या देवी सर्वभूतेषु शांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७ ॥ या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नम-

स्तस्यै नमो नमः ॥ १८ ॥ या देवी सर्वभूतेषु कांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १९ ॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २० ॥ या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २१ ॥ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २२ ॥ या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३ ॥ या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ॥

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २४ ॥ या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २५ ॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६ ॥ इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥ भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ २७ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २८ ॥ स्तुता सुरैः पूर्वमभीष्टसंश्रया-त्तथा सुरेंद्रेण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरीश्वरी

शुभानि भद्राण्यभिहंतु चापदः ॥ २९ ॥ या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ३० ॥ इति देवीसूक्तं पठित्वाऽष्टोत्तरशतं नवार्णजपं कृत्वा तदुत्तरन्यासान्विधाय ॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ ३१ ॥ इति पठित्वा देव्या वामहस्ते जपं निवेदयेत् ॥

प्राधानिकरहस्यम् ॥ अस्य श्रीसप्तशतीरहस्यत्रयस्य ब्रह्मविष्णुरुद्रा ऋषयः ॥ महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥

अनुष्टुप्छंदः ॥ नवदुर्गामहालक्ष्मीर्बीजं ॥ श्रींशक्तिः ॥ ममाभीष्टफलसिद्ध्ये सप्तशतीपाठांते जपे विनियोगः ॥ राजोवाच ॥ भगवन्नवतारा मे चंडिकायास्त्वयोदिताः ॥ एतेषां प्रकृतिं ब्रह्मन्प्रधानं वक्तुमर्हसि ॥ १ ॥ आराध्यं यन्मया देव्याः स्वरूपं येन वै द्विज ॥ विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे ॥ २ ॥ ऋषिरुवाच ॥ इदं रहस्यं परममनाख्येयं प्रचक्ष्यते ॥ भक्तोसीति न मे किंचित्तवावाच्यं नराधिप ॥ ३ ॥ सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥ ४ ॥ मातुलिंगं गदां

खेटं पानपात्रं च बिभ्रती ॥ नागं लिंगं च योनिं च विभ्रती नृप मूर्धनि ॥ ५ ॥ तप्तकांचनवर्णाभा तप्तकांचनभूषणा ॥ शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥ ६ ॥ शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ॥ बभार रूपमपरं तमसा केवलेन हि ॥ ७ ॥ सा भिन्नांजनसंकाशा दंष्ट्रांचितवरानना ॥ विशाललोचना नारी बभूव तनुमध्यमा ॥ ८ ॥ खड्गपात्र-शिरःखेटैरलंकृतचतुर्भुजा ॥ कबंधहारं शिरसा बिभ्राणा-हिशिरःस्रजम् ॥ ९ ॥ तां प्रोवाच महालक्ष्मीस्तामसीं प्रम-दोत्तमाम् ॥ ददामि तव नामानि यानि कर्माणि तानि ते

॥ १० ॥ महामाया महाकाली महामारी क्षुधा तृषा ॥ निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ॥ ११ ॥ इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ॥ एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् ॥ १२ ॥ तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप ॥ सत्वाख्येनातिशुद्धेन गुणेनेंदुप्रभं दधौ ॥ ॥ १३ ॥ अक्षमालांकुशधरा वीणापुस्तकधारिणी ॥ सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥ १४ ॥ महाविद्या महावाणी भारती वाक् सरस्वती ॥ आर्या ब्राह्मी कामधे-नुर्वेदगर्भा सुरेश्वरी ॥ १५ ॥ अथोवाच महालक्ष्मीर्महाकालीं

सरस्वतीम् ॥ युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ॥१६॥
इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ॥ हिरण्य-
गर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥ १७ ॥ ब्रह्मन्विधे विरं-
चेति धातरित्याह तं नरम् ॥ श्रीः पद्मे कमले लक्ष्मीत्याह
माता स्त्रियं च ताम् ॥ १८ ॥ महाकाली भारती च मिथुने
सृजतः सह ॥ एतयोरपि रूपाणि नामानि च वदामि ते ॥१९॥
नीलकंठं रक्तबाहुं श्वेतांगं चंद्रशेखरम् ॥ जनयामास पुरुषं
महाकाली सितां स्त्रियम् ॥ २० ॥ स रुद्रः शंकरः स्थाणुः
कपर्दी च त्रिलोचनः ॥ त्रयीविद्याकामधेनुः सा स्त्री भाषा-

स्वराक्षरा ॥ २१ ॥ सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप ॥ जनयामास नामानि तयोरपि विदामि ते ॥ २२ ॥ विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ॥ उमा गौरी सती चंडी सुंदरी सुभगा शुभा ॥ २३ ॥ एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ॥ चक्षुष्मंतोऽनुपश्यंति नेतरेऽतद्विदो जनाः ॥ २४ ॥ ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम् ॥ रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥ २५ ॥ स्वरया सह संभूय विरंचोंऽडमजीजनत् ॥ बिभेद भगवान् रुद्रस्तद्गौर्या सह वीर्यवान् ॥ २६ ॥ अंडमध्ये प्रधानादि कार्यजातमभू-

नृप ॥ महाभूतात्मकं सर्वं जगत्स्थावरजंगमम् ॥ २७ ॥ पुपोष पालयामास तल्लक्ष्म्या सह केशवः ॥ महालक्ष्मीरेवमजा राजन् सर्वेश्वरेश्वरी ॥ २८ ॥ निराकारा च साकारा सैव नानाभिधानभृत् ॥ नामांतरैर्निरूप्यैषा नाम्ना वान्येन केन-चित् ॥ २९ ॥ मार्कंडेयपु० प्राधानिकं रहस्यम् ॥

अथ वैकृतिकं रहस्यम् ॥

ऋषिरुवाच ॥ त्रिगुणा तामसी देवी सात्विकी या त्वयो-दिता ॥ सा शर्वा चंडिका दुर्गा भद्रा भगवतीर्यते ॥ १ ॥ योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ॥ मधुकैटभनाशार्थं

यां तुष्टावांबुजासनः ॥ २ ॥ दशवक्त्रा दशभुजा दशपादांज-
नप्रभा ॥ विशालया राजमाना त्रिंशल्लोचनमालया ॥ ३ ॥
स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप ॥ रूपसौभाग्यकां-
तीनां सा प्रतिष्ठा महाश्रियाम् ॥ ४ ॥ खड्गबाणगदाशूल-
शंखचक्रभुशुंडिभृत् ॥ परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं
दधौ ॥ ५ ॥ एषा सा वैष्णवी माया महाकाली दुरत्यया ॥
आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम् ॥ ६ ॥ सर्वदेवश-
रीरेभ्यो याविर्भूताऽमितप्रभा ॥ त्रिगुणा सा महालक्ष्मीः
साक्षान्महिषमर्दिनी ॥ ७ ॥ श्वेतानना नीलभुजा सुश्वेतस्तन-

मंडला ॥ रक्तमध्या रक्तपादा रक्तजंघोरुरुन्मदा ॥ ८ ॥
सुचित्रजघना चित्रमाल्यांबरविभूषणा ॥ चित्रानुलेपना
कांतिरूपसौभाग्यशालिनी ॥ ९ ॥ अष्टादशभुजा पूज्या सा
सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्र-
मात् ॥ १० ॥ अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः ॥ ११ ॥ शक्ति-
र्दंडश्चर्म चापं पानपात्रं कमंडलुः ॥ अलंकृतभुजामेभिरायुधैः
कमलासनाम् ॥ १२ ॥ सर्वदेवमयीमीशां महालक्ष्मीमिमां
नृप ॥ पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् ॥ १३ ॥

गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥ साक्षात्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी ॥ १४ ॥ दधौ चाष्टभुजा बाणान्मुसलं शूलचक्रभृत् ॥ शंखं घंटां लांगलं च कार्मुकं वसुधाधिप ॥ १५ ॥ एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥ निशुंभमथिनी देवी शुंभासुरनिबर्हिणी ॥ १६ ॥ इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥ उपासनं जगन्मातुः पृथगासां निशामय ॥ १७ ॥ महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥ दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ॥ १८ ॥ विरंचिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ॥ वामे लक्ष्म्या

हृषीकेशः पुरतो देवतात्रयम् ॥ १९ ॥ अष्टादशभुजा मध्ये वामे चास्या दशानना ॥ दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥ २० ॥ अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥ दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ २१ ॥ कालमृत्यू च संपूज्यौ सर्वारिष्टप्रशांतये ॥ यदा चाष्टभुजा पूज्या शुंभासुरनिबर्हिणी ॥ २२ ॥ नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ ॥ नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् ॥२३॥ अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः ॥ अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥ २४ ॥ महालक्ष्मीर्महाकाली सैव

प्रोक्ता सरस्वती ॥ ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥ ॥ २५ ॥ महिषांतकरी येन पूजिता स जगत्प्रभुः ॥ पूजये-ज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् ॥ २६ ॥ अर्घादिभि-रलंकारैर्गंधपुष्पैस्तथोत्तमैः ॥ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यस-मन्वितैः ॥ २७ ॥ रुधिराक्तेन बलिना मांसेन सुरया नृप ॥ प्रणामाचमनीयेन चंदनेन सुगंधिना ॥ २८ ॥ सकर्पूरैश्च तांबूलैर्भक्तिभावसमन्वितैः ॥ वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥ २९ ॥ पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥ दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥ ३० ॥ वाहनं

पूजयेद्देव्या धृतं येन चराचरम् ॥ ततः कृतांजलिर्भूत्वा स्तुवीत चरितैरिमैः ॥ ३१ ॥ एकेन वा मध्यमेन नैकेनेतरयोरिह ॥ चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात् ॥ ३२ ॥ स्तोत्रमंत्रैः स्तुवीतेमां यदि वा जगदंबिकाम् ॥ प्रदक्षिणानमस्कारान्कृत्वा मूर्ध्नि कृतांजलिः ॥ ३३ ॥ क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतंद्रितः ॥ प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ॥ ३४ ॥ जुहुयात्स्तोत्रमंत्रैर्वा चंडिकायै शुभं हविः ॥ नमोनमःपदैर्देवीं पूजयेत्सुसमाहितः ॥ ३५ ॥ प्रयतः प्रांजलिः प्रह्वः प्राणानारोप्य चात्मनि ॥ सुचिरं भावयेद्देवीं

चंडिकां तन्मयो भवेत् ॥ ३६ ॥ एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् ॥ भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् ॥ ३७ ॥ यो न पूजयते नित्यं चंडिकां भक्तवत्सलाम् ॥ भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ॥ ३८ ॥ तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ॥ यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि ॥ ३९ ॥ मार्कंडेयपु० वैकृतिकं रहस्यम् ॥ ॥ ॥ ॥ ॥

अथ मूर्तिरहस्यम् ॥

ऋषिरुवाच ॥ नंदा भगवती नाम या भविष्यति नंदजा ॥

सा स्तुता पूजिता ध्याता वशीकुर्याज्जगत्त्रयम् ॥ १ ॥ कन-
कोत्तमकांतिः सा सुकांतिकनकांबरा ॥ देवी कनकवर्णाभा
कनकोत्तमभूषणा ॥ २ ॥ कमलांकुशपाशाब्जैरलंकृतचतुर्भु-
जा ॥ इंदिरा कमला लक्ष्मीः सा श्री रुक्मांबुजासना ॥ ३ ॥
या रक्तदंतिका नाम देवी प्रोक्ता मयानघ ॥ तस्याः स्वरूपं
वक्ष्यामि शृणु सर्वभयापहम् ॥ ४ ॥ रक्तांबरा रक्तवर्णा रक्त-
सर्वांगभूषणा ॥ रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥
॥ ५ ॥ रक्ततीक्ष्णनखा रक्तदशना रक्तदंष्ट्रिका ॥ पतिं नारी-
वानुरक्ता देवी भक्तं भजेज्जनम् ॥ ६ ॥ वसुधेव विशाला

सा सुमेरुयुगलस्तनी ॥ दीर्घौ लंबावतिस्थूलौ तावतीव मनोहरौ ॥ ७ ॥ कर्कशावतिकांतौ तौ सर्वानंदपयोनिधी ॥ भक्तान्संपाययेद्देवी सर्वकामदुघौ स्तनौ ॥ ८ ॥ खड्गपात्रं च मुसलं लांगलं च बिभर्ति सा ॥ आख्याता रक्तचामुंडा देवी योगेश्वरीति च ॥ ९ ॥ अनया व्याप्तमखिलं जगत्स्थावरजंगमम् ॥ इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥१०॥ अधीते य इमं नित्यं रक्तदंत्या वपुःस्तवम् ॥ तं सा परिचरेद्देवी पतिं प्रियमिवांगना ॥ ११ ॥ शाकंभरी नीलवर्णा नीलोत्पलविलोचना ॥ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी ॥ १२ ॥

सुकर्कशसमोत्तुंगवृत्तपीनघनस्तनी ॥ मुष्टिं शिलीमुखैः पूर्णं कमलं कमलालया ॥ १३ ॥ पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयम् ॥ काम्यानंतरसैर्युक्तं क्षुत्तृण्मृत्युजरापहम् ॥ १४ ॥ कार्मुकं च स्फुरत्कांति बिभर्ति परमेश्वरी ॥ शाकंभरी शताक्षी स्यात् सैव दुर्गा प्रकीर्तिता ॥ १५ ॥ शाकंभरीं स्तुवन्ध्यायन् जपन्संपूजयन्नमन् ॥ अक्षय्यमश्नुते शीघ्रमन्नपानादि सर्वशः ॥ १६ ॥ भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥ विशाललोचना नारी वृत्तपीनघनस्तनी ॥ १७ ॥ चंद्रहासं च डमरुं शिरःपात्रं च बिभ्रती ॥ एकवीरा कालरात्रिः सै-

वोक्ता कामदा स्तुता ॥ १८ ॥ तेजोमंडलदुर्धर्षा भ्रामरी चित्रकांतिभृत् ॥ चित्रभ्रमरसंकाशा महामारीति गीयते ॥ ॥ १९ ॥ इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप ॥ जगन्मातुश्चंडिकायाः कीर्तिताः कामधेनवः ॥ २० ॥ इदं रहस्यं परमं न वाच्यं यस्य कस्यचित् ॥ व्याख्यानं दिव्यमूर्तीनामधीष्वावहितः स्वयम् ॥ २१ ॥ देव्या ध्यानं तवाख्यातं गुह्याद्गुह्यतरं महत् ॥ तस्मात्सर्वप्रयत्नेन सर्वकामफलप्रदम् ॥ २२ ॥ मार्कंडेयपुराणे खिलांशे मूर्तिरहस्यम् ॥ ॥ उत्तरविधिः ॥ पुनरुत्कीलनमंत्रजपः ॥ ॥ ॐश्रींक्लींह्रीं

सप्तशतिचंडिके उत्कीलनं कुरुकुरुस्वाहा ॥ २१ ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थं यंत्रस्थदेवतानां पाठोत्तरांगपंचोपचारपूजनं करिष्ये ॥ अस्य श्रीनवार्णमंत्र० पाठोत्तरांगपूजने विनियोगः ॥ मूलमंत्रेणावाहितदेवताः संपूज्य अपराधसह० आवाहनं० मंत्रहीनं० मत्समो नास्ति० अज्ञानाद्विस्मृतेर्भ्रांत्या० ॥ कामेश्वरि जगन्मातः सच्चिदानंदविग्रहे ॥ गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ २ ॥ अपराधशतं कृत्वा जगदंबेति चोच्चरेत् ॥ यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ ४ ॥ सापराधोऽस्मि शरणं प्राप्तस्त्वां जग-

दंबिके ॥ इदानीमनुकंप्योऽहं यथेच्छसि तथा कुरु ॥ ५ ॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु
मे देवि त्वत्प्रसादात्सुरेश्वरि ॥ इति प्रार्थ्य ॥ अनेन पूर्वसंक-
ल्पितशतचंडीसंख्यापरिपूर्तये नवचंडीसंख्यापरिपूर्तये वा
कवचार्गलाकीलकनवार्णमंत्राष्टोत्तरशतजपरात्रिसूक्तपठनपूर्वकं
देवीसूक्तनवार्णमंत्राष्टोत्तरशतजपरहस्यत्रयजपांतं श्रीचंडीस-
प्तशत्याः पाठाख्येन कर्मणा ॥ अथवा सपल्लवे चंडीसप्तशत्याः
प्रतिमंत्रांते अमुकमंत्रपल्लवितायाः पाठाख्येन कर्मणा ॥ अथवा
श्रीचंडीसप्तशत्याः प्रतिमंत्रादौ अमुकमंत्रयोजितायाः पाठा-

ख्येन कर्मणा ॥ अथवा श्रीचंडीसप्तशत्याः प्रतिमंत्रं आद्यं-
तयोः अमुकमंत्रसंपुटितायाः पाठाख्येन कर्मणा भगवती
श्रीमहाकाली० ३ स्वरूपिणी अमुकदेवता प्रीयताम् ॥ आच-
मनं ॥ ॐऐं आत्मतत्वं शोधयामि नमः स्वाहा ॥ ॐह्रीं
विद्यातत्वं शोधयामि नमः स्वाहा ॥ ॐक्लीं शिवतत्वं शो-
धयामि नमः स्वाहा ॥ ॐऐंह्रींक्लीं सर्वतत्वं शोधयामि नमः
स्वाहा इत्येवं द्विराचमनं विधाय ॥ यदक्षरपदभ्रष्टं० विसर्ग-
बिंदुमात्राश्च० इति संप्रार्थ्य ॐस्वः भुवः भूः ॐ इति आस-
नाधो जलमृदा स्वललाटे तिलकं कृत्वा यथासुखं विहरे-

दिति शिवम् ॥ ॥ एवं धौरेयकुलोत्पन्नश्रीकृष्णशर्मणा रचि-
ता ॥ पद्धतिरनया भूयाच्छ्रीदुर्गा प्रीतमानसा सदया ॥ १ ॥
यथामति विचार्येऽयं सप्तशत्याः सुपद्धतिः ॥ कृता मया
बुधैः शोध्या सदयैश्च विमत्सरैः ॥ २ ॥ ॥ ७ ॥

इत्युत्तरविधिः समाप्तः

॥ अथ नवचंडीशतचंडीसहस्र-चंडीहोमप्रयोगः ॥

श्रीगणेशाय नमः ॥ यजमानः शुभदिने सपत्नीकस्तिलतैलेन कृताभ्यंगः स्नात्वा सपूर्णकलशहस्तो मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्योपविश्य देशकालौ स्मृत्वा ममेह-जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्विपुलध-नधान्यपुत्रपौत्राद्यनवच्छिन्नसंततिस्थिरलक्ष्मीकीर्तिलाभशत्रु-पराजयसदभीष्टसिद्ध्यर्थं ममामुककार्यसिद्ध्यर्थं वा सनवग्रह-मखां नवचंडीं शतचंडीं सहस्रचंडीं वा ब्राह्मणद्वारा करिष्ये ॥ तदंगतया गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदी-श्राद्धमाचार्यादिवरणं च करिष्ये ॥ इति संकल्प्य तानि

कृत्वा आचार्यादीन्वृत्वा तान्यथाविभवं वस्त्रादिना संपूज्य प्रार्थयेच्च ॥ ते च शतचंड्यां दश ॥ सहस्रचंड्यां शतं ॥ केचिदत्र ग्रहजपार्थमेकमृत्विजं वरयंति ॥ अथाचार्यः आचम्य देशकालौ संकीर्त्य यजमानेन वृतोहमाचार्यकर्म करिष्ये इति संकल्प्य यदत्रेतिगौरसर्षपान्विकीर्य पंचगव्येन कुशोदकेन वा मंडपं प्रोक्षेत् ॥ शुचीवोहव्या० आपो-हिष्ठा० अपवित्रः० ॥ पृथ्वि त्वया० इत्युपविश्य अनंता-सनाय नमः ॥ विमलासनाय० ॥ पद्मासनाय० ॥ अपक्रा-मंतु० इति भूमौ वामपादघातत्रयं कृत्वा यथोपदेशं विस्तरतः

संक्षेपेण वा भूतशुद्ध्यादि कृत्वा नवार्णविध्युक्तैकादश-न्यासान्कुर्यात् ॥ अथवैकादशमेवैकं न्यासं कुर्यात् ॥ ततो योनिमुद्रां प्रदर्श्य ध्यायेत् ॥ श्वेतानना नीलभुजा सुश्वेतस्तनमंडला ॥ रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा ॥ सुचित्रजघना चित्रमाल्यांबरविभूषणा ॥ चित्रानुलेपना कांतिरूपसौभाग्यशालिनी ॥ अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात् ॥ अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥ चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः ॥ शक्तिर्दंडश्चर्म चापं पानपात्रं

कमंडलुरिति ॥ ततो वेद्यां सर्वतोभद्रमष्टदलं वा विलिख्य तत्र ब्रह्मादिमंडलदेवताः संस्थाप्य तन्मध्ये महीद्यौरित्यादिमंत्रैः कलशं संस्थाप्य तस्मिन्गंधपुष्पफलसर्वौषधिदूर्वापंचपल्लवसप्त-मृत्तिकास्तत्तन्मंत्रेण निक्षिप्य वस्त्रद्वयेनावेष्ट्य तदुपरि पूर्णपात्रं निधाय कलशेवरुणमावाह्य पूजयेत् ॥ ततःकलशदेवताःस्म-रेत् ॥ कलशस्यमुखेविष्णुः० देवदानवसंवादेमथ्य० प्रसन्नो भव सर्वदा इतिकलशं प्रार्थयेत् ॥ तथा कलशोपरिस्थपूर्णपा-त्रेवक्ष्येयंत्रं लिखेत् ॥ तद्यथा ॥ मध्येत्रिकोणं तद्बहिःषट्कोणं तद्बाह्येवृत्तंतद्बाह्येऽष्टौदलानितद्बाह्येचतुर्द्वारंचतुरस्रत्रयमिति ।

एवं यंत्रं विलिख्य तत्राष्टादशभुजां अष्टभुजां वा सिंहारूढां सौवर्णींदेवीमूर्तिमग्न्युत्तारणप्राणप्रतिष्ठापूर्वकं प्रतिष्ठाप्य पूजयेत् ॥ तद्यथा ॥ स्ववामे कर्पूरादियुतजलपूर्णकलशंसंपूज्य कलशस्यमुखे० गंगेचयमुने० इत्यादिपठित्वा कलशमुद्रांप्रदर्श्य दक्षिणतः शंखंसंपूज्य ॥ शंखंचंद्रार्कदैवत्यमित्यादि पठित्वा शंखमुद्रांप्रदर्श्यशंखोदकेनात्मानंपूजाद्रव्याणिच प्रोक्षेत् ॥ अपवित्रः पवित्रोवा० ॥ पीठपूजांकुर्यात् ॥ देवीदक्षिणे गुंगुरुभ्यो नमः ॥ पं परमगुरुभ्योनमः ॥ पं परात्परगुरुभ्योनमः ॥ पं परमेष्ठिगुरुभ्योनमः ॥ वामे गं गणपतयेनमः ॥ दुं दुर्गायै

नमः ॥ क्षं क्षेत्रपालाय० ॥ मध्ये आधारशक्त्यैनमः ॥ मूल-प्रकृत्यै० ॥ कालाग्निरुद्राय० ॥ महामंडूकाय० कूर्माय० वराहाय० अनंताय० भूम्यै० अमृतार्णवाय० रत्नद्वीपाय० हेमगिरये० नंदनोद्यानाय० मणिभूम्यै० रत्नमंडपाय० कल्पतरवे० रत्नसिंहासनाय० ॥ आग्नेय्यादिकोणेषु धर्माय० ज्ञानाय० वैराग्याय० ऐश्वर्याय० अधर्माय० अज्ञानाय० अवैराग्याय० अनैश्वर्याय० ऊर्ध्वं ब्रह्मणे० अधः अनंताय० मध्ये वास्तुपुरुषाय० सं सत्वाय० रं रजसे० तं तमसे० मां मायायै० विं विद्यायै० ॥ पूर्वाद्यष्टदिक्षुउड्डाणपीठेश्वरसहि-

तामुड्डाणपीठेश्वर्यंबापादुकां पूजयामि ॥ मातृकापीठेश्वरसहितां मातृकापीठेश्वर्यंबापादुकां० ॥ जालंधरपीठेश्वरसहितां जालंधरपीठेश्वर्यंबापादुकां० ॥ कोल्हागिरिपीठेश्वरसहितांकोल्हागिरिपीठेश्वर्यंबापादुकां० ॥ पूर्णगिरिपीठेश्वरसहितां पूर्णगिरिपीठेश्वर्यंबापादुकां ॥ संहारगिरिपीठेश्वरसहितां संहारगिरिपीठेश्वर्यंबापादुकां० ॥ कोल्हापुरपीठेश्वरसहितांकोल्हापुरपीठेश्वर्यंबापा० ॥ कामरूपपीठेश्वरसहितांकामरूपपीठेश्वर्यंबापा० ॥ पुनःपूर्वादिचतुर्दिक्षु गं गणेशायनमः क्षं क्षेत्रपालाय० पां पादुकाभ्यो० वं बटुकेभ्यो० ॥ आग्नेय्यादिवि-

दिक्षु जं जयायैन० विं विजयायैन० जं जयंत्यै० अं अप-
राजितायै० ॥ तत्रैव अग्निमुखवेतालाय नमः प्रेतवाहनवे-
तालाय० ॥ ज्वालामुखवेतालाय० धूम्राक्षवेतालाय० कंदाय०
नालाय० दलेभ्यो० केसरेभ्यो नमः कर्णिकायै० अं सूर्यमं-
डलाय० उं सोममंड० मं वह्निमंडलाय० अं आत्मने० उं अंत-
रात्मने० पं परमात्मने० उं ज्ञानात्मने० विं विष्णुमायायै०
चें चेतनायै० बुं बुद्ध्यै० निं निद्रायै० क्षुं क्षुधायै० छां छायायै०
शं शक्त्यै० तृं तृष्णायै० क्षां क्षांत्यै० जां जात्यै० लं ललि-
तायै० शां शांत्यै० श्रं श्रद्धायै० कां कांत्यै० लं लक्ष्म्यै०

धृं धृत्यै० वृं वृद्ध्यै० स्मृं स्मृत्यै० दं दयायै० तुं तुष्ट्यै० पुं पुष्ट्यै० मां मातृकायै० भ्रां भ्रांत्यै० ह्रींसर्वशक्तिकमलासनाय० सर्वात्मसंसर्गयोगपीठात्मने० इति पीठपूजा ॥ तथा स्थापितमूर्तौदेवीमावाहयेत् ॥ आगच्छवरदेदेविदैत्यदर्पनिषूदिनि ॥ पूजांगृहाण सुमुखि नमस्तेशंकरप्रिये ॥ दुर्गेदेविसमागच्छसान्निध्यमिहकल्पय ॥ बलिंपूजांगृहाणत्वमष्टाभिःशक्तिभिः सह ॥ मूर्तौमंत्रौपठित्वा मूर्तौदेवीमावाह्य मूलमंत्रेणजयंतीमंगलाकालीत्यनेनवा आसनपाद्यार्घ्याचमनमधुपर्कान्निवेदयेत् ॥ ततःपंचामृतस्नानं ॥ देवीसूक्तश्रीसूक्तसरस्वतीसूक्तैर्देवीमा-

हात्म्योक्तैः शक्रादयइत्यादिस्तोत्रैश्चाभिषेकः ॥ ततःपूर्वोक्त-मंत्रेण वस्त्रकंचुकाभरणाष्टगंधबिल्वपत्रनानापुष्पहरिद्राकुंकु-मसिंदूरालक्तकपरिमलद्रव्याणिसमर्पयेत् ॥ अथांगपूजा ॥ दुर्गायै० पादौ० ॥ गिरिजायै० गुल्फौ० ॥ अपर्णायै० जानुनी० ॥ हरिप्रियायै० ऊरू० ॥ पार्वत्यै० कटिं० ॥ आर्यायै० नाभिं० ॥ जगन्मात्रे० उदरं ॥ मंगलायै० कु-क्षिं० ॥ शिवायै० हृदयं० ॥ माहेश्वर्यै० कंठं० ॥ विश्ववं-द्यायै० स्कंधौ० ॥ काल्यै० बाहू० ॥ आद्यायै० हस्तौ० ॥ वरदायै० मुखं० ॥ सुवाण्यै० नासिकां० ॥ कमलाक्ष्यै०

नेत्रे० ॥ अंबिकायै० शिरः० ॥ देव्यै० सर्वांगं ॥ ॥ अथा-ष्टोत्तरशतनामानि ॥ माहेश्वर्यै नमः महादेव्यै० जयंत्यै० सर्वमंगलायै० लज्जायै० भगवत्यै० वंद्यायै० भवान्यै० पाप-नाशिन्यै० चंडिकायै० कालरात्र्यै० भद्रकाल्यै० अपरा-जितायै० महाविद्यायै० महामेधायै० महामायायै० महा-बलायै० कात्यायन्यै० जयायै० दुर्गायै० मंदारवनवासि-न्यै० आर्यायै० गिरिसुतायै० धात्र्यै० महिषासुरघातिन्यै० सिद्धिदायै० बुद्धिदायै० नित्यायै० वरदायै० वरवर्णिन्यै० अंबिकायै० सुखदायै० सौम्यायै० जगन्मात्रे० शिवप्रिया-

यै० भक्तसंतापसंहर्त्र्यै० सर्वकामप्रपूरिण्यै० जगत्कर्त्र्यै० जगद्धात्र्यै०जगत्पालनतत्परायै० अव्यक्तायै० व्यक्तरूपायै० भीमायै० त्रिपुरसुंदर्यै० अपर्णायै० ललितायै० वेद्यायै० पूर्णचंद्रनिभाननायै० चामुंडायै० चतुरायै० चंद्रायै० गुण-त्रयविभागिन्यै० हेरंबजनन्यै० काल्यै० त्रिगुणायै० यशो-धारिण्यै० उमायै० कलशहस्तायै० दैत्यदर्पनिषूदिन्यै० बुद्ध्यै० कांत्यै० क्षमायै० शांत्यै० पुष्ट्यै० तुष्ट्यै० धृत्यै० मत्यै० वरायुधधरायै० धीरायै० गौर्यै० शाकंभर्यै० शिवायै० अष्ट-सिद्धिप्रदायै० वामायै० शिववामांगवासिन्यै० धर्मदायै०

धनदायै० श्रीदायै० कामदायै० मोक्षदायै० अपरायै० चित्स्वरूपायै० चिदानंदायै० जयश्रियै० जयदायिन्यै० सर्वमंगलमांगल्यायै० जगत्त्रयहितैषिण्यै० शर्वाण्यै० पार्वत्यै० धन्यायै० स्कंदमात्रे० अखिलेश्वर्यै० प्रपन्नार्तिहरायै० देव्यै० सुभगायै० कामरूपिण्यै० निराकारायै० साकारायै० महाकाल्यै० सुरेश्वर्यै० शर्वायै० श्रद्धायै० ध्रुवायै० कृत्यायै० मृडान्यै० भक्तवत्सलायै० सर्वशक्तिसमायुतायै० शरण्यायै० सर्वकामदायै० इत्यष्टोत्तरशतनामानि ॥ अथावरणपूजा ॥ देव्या दक्षिणे ऐंमहाकाल्यैविच्चेनमः ॥ वामे ह्रींमहालक्ष्म्यै

विच्चेनमः ॥ पुरतः क्लींमहासरस्वत्यैविच्चेनमः ॥ वामे हूंमहिषायनमः ॥ दक्षिणे क्षौंसिंहायनमः ॥ पुरतः गंगणपतयेनमः ॥ ह्रुं कालायनमः ॥ पश्चात् ह्रूं मृत्यवेनमः ॥ षट्दलेषु ह्रैं रुद्रायनमः ॥ ह्रौं गौर्यैनमः ॥ श्रीं विष्णवेनमः ॥ श्रीं लक्ष्म्यैनमः ॥ ऐं ब्रह्मणेनमः ॥ ऐं सरस्वत्यैनमः ॥ तत्रैव ह्रां हृदयायनमः ॥ ह्रीं शिरसे स्वाहा ॥ ह्रूं शिखायैवषट् ॥ ह्रैं कवचाय हुं ॥ ह्रौं नेत्रत्रयाय वौषट् ॥ ह्रः अस्त्रायफट् ॥ तत्रैव गुं गुरुभ्योनमः ॥ पं परमगुरुभ्योनमः ॥ पं परमेष्ठीगुरुभ्योनमः ॥ हरयेनमः ॥ हरायनमः ॥ गणेशायनमः ॥ तत्रैव

नंदजायै० रक्तदंतिकायै० शाकंभर्यै० दुर्गायै० भीमायै० भ्रामर्यै० ॥ अथाष्टदलेषु ब्राह्मयै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० नारसिंह्यै० चामुंडायै० ॥ पूर्वादिदिक्षु अं असितांगभैरवाय० रुं रुरुभैरवाय० चं चंड-भैरवाय० क्रों क्रोधभैरवाय० उं उन्मत्तभैरवाय० कं कपा-लभैरवाय० भीं भीषणभैरवाय० सं संहारभैरवाय० ॥ पुनः पूर्वादिषु लं इंद्राय० रं अग्नये० मं यमाय० षं निर्ऋतये० वं वरुणाय० यं वायवे० सं सोमाय० हं ईशानाय० ॥ तद्बहिः पूर्वादि वज्राय० शक्त्यै० दंडाय० खड्गाय० पाशा-

य० अंकुशाय० गदायै० त्रिशूलाय० इत्यावरणपूजा ॥ ततः पूर्वोक्तमंत्रेणधूपदीनैवेद्यादिमंत्रपुष्पांतपूजांकृत्वा नमो देव्यैमहादेव्यैइत्यादिमंत्रैर्नमस्कृत्य यथासंभवंछत्रचामरगीतनृत्यवाद्यादिसमर्प्य कूष्मांडनारिकेलकदलीफलादिबलिं दत्वा ॥ मंत्रहीनंक्रियाहीनं० आवाहनंनजानामि० ॥ अनेनपूजनेन श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यः प्रीयंतां ॥ ॥ ततः कुमारीपूजा ॥ देशकालौ संकीर्त्य शतचंडीजपांगत्वेनकुमारीपूजांकरिष्ये इतिसंकल्प्यमूलेनषडंगंकृत्वामूलमंत्रमुच्चार्य ॥ मंत्राक्षरमयीं देवीं मातृणां रूपधारिणीं ॥ नवदुर्गात्मिकां

साक्षात्कन्यामावाहयाम्यहं ॥ इति कुमारीमावाह्य यथासंभवं पूजयेत् ॥ कुमार्यश्च प्रत्यहं शतंनवएकावा यथाशक्ति वा पूज्या ॥ प्रत्यहमेकवृद्ध्या वा पूजयेत् ॥ ततोब्राह्मणसुवासिनीपूजा ॥ एवं देवीकुमार्यादिपूजा प्रत्यहं कार्या ॥ ततः सर्वे विप्राःकृतांगन्यासाः शतंनवार्णमंत्रं जप्त्वा कवचार्गलकीलकानि सकृज्जप्त्वा सप्तशतींजप्त्वांतेरहस्यानि नवार्णं शतं च जपेत् एकस्मिन्दिनेअनेकावृतिषु तु कवचादीनां प्रत्यावृत्ति नावृत्तिः ॥ एवमृत्विजः प्रथमदिने एकं द्वितीयेद्वे तृतीयेत्रीणि चतुर्थेचत्वारिरूपाणीत्येवं जपं कुर्युः ॥ ऋत्विजां यजमानस्य प्रत्यहं क्षीर-

मात्राशनं अशक्तौ हविष्याशनं वा। प्रत्यहंसहस्रंशतंदशवा ब्राह्मणान्भोजयेत् पंचमेह्निहोमः॥ नवरात्रेतु नवम्यामेव होमः॥ क्वचित्तुअष्टम्यामारभ्यनवम्यांसमापयंति ॥ ॥ अथहोमः ॥ देशकालौस्मृत्वामयाब्राह्मणद्वाराकृतस्यशतचंडीजपस्य संपूर्णतासिद्ध्यर्थं जपदशांशेन तिलादिमिश्रपायसद्रव्येण होमं करिष्ये इतिसंकल्प्य ॥ अत्रकेचित्पुण्याहवाचनमपिकुर्वंति ॥ तथापूर्वोक्तकलशस्थापनं देवतास्थापनं पूजनं चात्रैवकुर्वंति ॥ ततः सनवग्रहशतचंडीजपदशांशहोमंकर्तुं स्थंडिलादिकरिष्ये इतिसंकल्प्य स्थंडिलमुपलिप्योल्लिख्य तत्र (शत)मंगलना-

मानमग्निंप्रतिष्ठाप्य समिध्य ध्यायेत् ॥ ततः प्रागकृतंचेदिदानीमीशान्यांदिशिनवग्रहस्थापनंकृत्वा तत्पूर्वतः कलशंस्थापयेत् ॥ ततोग्निसमीपमागत्यान्वाधानंकुर्यात् ॥ समिद्द्वयमादाय क्रियमाणेशतचंडीजपांगहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये ॥ अस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वा आदित्यादिनवग्रहान् प्रतिद्रव्यमष्टाविंशतिसंख्याकाभिरष्टाभिर्वा समित्तिलाज्याहुतिभिः अधिदेवताः प्रत्यधिदेवताश्चचतुःसंख्याकाभिःतैरेवद्रव्यैः गणपतिचतुष्टयं इंद्राद्यष्टौलोकपालांश्चैकैकयासमित्तिलाज्याहुत्यायक्ष्ये ॥ महा-

कालीमहालक्ष्मीमहासरस्वतीमूलमंत्रेण शतवारं सप्तशती-मंत्रैः जपदशांशसंख्यया पायसतिलपलाशपुष्पसर्षपपूगीफल-लाजादूर्वांकुरयवबिल्वफलरक्तचंदनगुग्गुलुद्रव्यैर्यथालाभद्रव्यै-र्वा तिलमिश्रपायसेन वा पुनर्मूलमंत्रेण शतवारं तैरेव द्रव्यैः आधारशक्त्यादिपीठदेवताः महाकाल्याद्यावरणदेवताश्चैकै-काहुत्यापायसाज्येनयक्ष्ये शेषेणस्विष्टकृतमित्याद्याज्यभागांतं कृत्वा ॥ यजमानः इदंहवनीयद्रव्यं यथादैवतमस्तु नममेति त्यजेत् ॥ नवग्रहादिभ्यः समित्तिलाज्यानिहुत्वा उक्तद्रव्या-णिमूलमंत्रेणशतवारंहुत्वासप्तशतीमंत्रैर्जपदशांशेनहुत्वा पुन-

मूलमंत्रेण शतवारंजुहुयात् ॥ मूलमंत्रोनवार्णमंत्रः ॥ नवार्णमंत्रस्यकेवलाज्येनैववाहोमः ॥ अत्राध्यायसमाप्तौउवाचस्थलेचपत्रपुष्पफलैर्होमः ॥ एवंप्रधानहोमंकृत्वापीठदेवताभ्यो नामभिराज्यंपायसंचजुहुयात् ॥ आधारशक्त्यै० मूलप्रकृत्यै० कालाग्निरुद्राय० महामंडूकाय० कूर्माय० वराहाय० अनंताय० भूम्यै० अमृतार्णवाय० रत्नद्वीपाय० हेमगिरये० नंदनोद्यानाय० मणिभूम्यै० रत्नमंडपाय० कल्पतरवे० रत्नसिंहासनाय० धर्माय० ज्ञानाय० वैराग्याय० ऐश्वर्याय० अधर्माय० अज्ञानाय० अवैराग्याय० अनैश्वर्याय० ब्रह्म-

णे० अनंताय० वास्तुपुरुषाय० सं सत्वाय० रं रजसे० तं तमसे० मां मायायै० विं विद्यायै० उड्डाणपीठेश्वरसहितोड्डाणपीठेश्वर्यंबायै० मातृकापीठेश्वरसहितमातृकापीठेश्वर्यंबायै० जालंधरपीठेश्वरसहितजालंधरपीठेश्वर्यंबायै कोल्हागिरिपीठेश्वरसहितकोल्हागिरिपीठेश्वर्यंबायै० पूर्णगिरिपीठेश्वरसहितपूर्णगिरिपीठेश्वर्यंबायै० संहारगिरिपीठेश्वरसहितसंहारगिरिपीठेश्वर्यंबायै० कोल्हापुरपीठेश्वरसहितकोल्हापुरपीठेश्वर्यंबायै० कामरूपपीठेश्वरसहितकामरूपपीठेश्वर्यंबायै० गं गणेशाय० क्षं क्षेत्रपालाय० पां पादुकाभ्यो० वं

बटुकेभ्यो० जं जयायै० विं विजयायै० जं जयंत्यै० अं अपराजितायै० अग्निमुखवेतालाय० प्रेतवाहनवेतालाय० ज्वालामुखवेतालाय० धूम्राक्षवेतालाय० कंदाय० नालाय० दलेभ्यो० केसरेभ्यो० कर्णिकायै० अं सूर्यमंडलाय० उं सोममंडलाय० मं वह्निमंडलाय० अं आत्मने० उं अंतरा-त्मने० पं परात्मने० उं ज्ञानात्मने० विं विष्णुमायायै० चें चेतनायै० बुं बुद्ध्यै० निं निद्रायै० क्षुं क्षुधायै० छां छायायै० शं शक्त्यै० तृं तृष्णायै० क्षां क्षांत्यै० जां जात्यै० लं ललितायै० शां शांत्यै० श्रं श्रद्धायै० कां कांत्यै० लं

लक्ष्म्यै० धृं धृत्यै० वृं वृद्ध्यै० स्मृं स्मृत्यै० दं ददायै० तुं तुष्ट्यै० पुं पुष्ट्यै० मां मातृकायै० भ्रां भ्रांत्यै० ह्रीं सर्वशक्तिकमलासनाय० सर्वात्मसंसर्गयोगपीठात्मने० इति पीठदेवताहोमः । अथावरणदेवताः । ऐं महाकाल्यैविच्चे ह्रीं महालक्ष्मैविच्चे क्लीं महासरस्वत्यैविच्चे ह्रूं महिषाय० क्षं सिंहाय० गं गणपतये० ह्रूं कालाय० ह्रूं मृत्यवे० ह्रैं रुद्राय० ह्रौं गौर्यै० श्रीं विष्णवे० श्रीं लक्ष्म्यै० ऐं ब्रह्मणे० ऐं सरस्वत्यै० ह्रां हृदयाय० ह्रीं शिरसे० ह्रूं शिखायै० ह्रैं कवचायहुं ह्रौं नेत्रत्रयायवौषट् ह्रः अस्त्रायफट् गुं गुरुभ्यो०

पं परमगुरुभ्यो० पं परमेष्ठिगुरुभ्यो० हरये० हराय० गणेशाय० नंदजायै० रक्तदंतिकायै० शाकंभर्यै० दुर्गायै० भीमायै० भ्रामर्यै० ब्राह्म्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० नारसिंह्यै० चामुंडायै० अं असितांगभैरवाय० रुं रुरुभैरवाय० चं चंडभैरवाय० क्रों क्रोधभैरवाय० उं उन्मत्तभैरवाय० कं कपालभैरवाय० भीं भीषणभैरवाय० सं संहारभैरवाय० लं इंद्राय० रं अग्नये० मं यमाय० क्षं निर्ऋतये० वं वरुणाय० यं वायवे० सं सोमाय० हं ईशानाय० वज्राय० शक्त्यै० दंडाय० खड्गाय०

पाशाय० अंकुशाय० गदायै० त्रिशूलाय० ॥ एवंहोमंकृत्वा स्विष्टकृदादिप्रायश्चित्तहोमांतं कृत्वा इंद्रादिनवग्रहक्षेत्रपालादिभ्यो माषभक्तबलींस्तत्तन्मंत्रैर्दद्यात् ॥ तत्रमंत्राः ॥ इंद्रंवो० इंद्रः सुरपतिश्चैव वज्रहस्तो महाबलः ॥ शतयागाधिपो देवस्तस्मैनित्यंनमोनमः ॥ इंद्रायसांगायसपरिवारायसशक्तिकायसायुधायइमंसदीपमाषभक्तबलिंसमर्पयामि भोइंद्रइमंबलिंभक्षदिशंरक्षममयजमानस्यआयुःकर्ताशांतिकर्तापुष्टिकर्ता तुष्टिकर्ता कल्याणकर्ता वरदोभव ॥ अनेनबलिदानेनइंद्रःप्रीयतां ॥ १ ॥ अग्निंदूतं० आग्नेयःपुरुषोरक्तःसर्वदेवमयोव्ययः ॥

धूमकेतुरनाधृष्यस्तस्मैनित्यंनमोनमः अग्नये० इत्यादि० ॥ २ ॥ यमायसोमं० यमश्चोत्पलपत्राक्षः किरीटीदंडधृक्सदा ॥ लोकसाक्षी विशुद्धात्मा तस्मैनित्यंनमोनमः ॥ यमायसांगायेत्यादि० ॥ ३ ॥ मोषुणः परापरा० निर्ऋतिस्तुपुमान्कृष्णः सर्वरक्षोधिपोमहान् ॥ खड्गहस्तोमहासत्वस्तस्मैनित्यं० निर्ऋतये सांगायेत्यादि० ॥ ४ ॥ तत्त्वायामि० वरुणःसर्वलोकेषुपुरुषोनिम्नगाधिपः ॥ पाशहस्तोमहाबाहुस्तस्मैनित्यं० वरुणाय सांगायेत्यादि० ॥ ५ ॥ तववाय० सर्वप्राणात्मकोवायुःसर्वजंतुष्ववस्थितः ॥ ध्वजहस्तोमहाप्राणस्तस्मैनित्यं० वा-

यवेसांगायेत्यादि० ॥ ६ ॥ सोमोधेनुं० गौरोयस्तु पुमान्सौ-
म्यःसर्वौषधिसमन्वितः ॥ नक्षत्राधिपतिःसोमस्तस्मैनित्यं०
सोमायसांगायेत्यादि० ॥ ७ ॥ तमीशानं० ईशानःपुरुषः
शुक्लःसर्वदेवाधिपो महान् ॥ शूलहस्तोविरूपाक्षस्तस्मैनित्यं०
ईशानायसांगायेत्यादि० ॥ ८ ॥ आयंगौःपृश्नि० योसावनं-
तरूपेणब्रह्मांडंसचराचरम् ॥ पुष्पवद्धारयेन्मूर्भ्रितस्मैनित्यं०
अनंतायसांगायेत्यादि० ॥ ९ ॥ ब्रह्मजज्ञानं० पद्मयोनिश्च-
तुर्मूर्तिर्वेदावासः पितामहः ॥ कमंडलुधरोदेवस्तस्मै० ॥ ब्रह्म-
णेसांगायेत्यादि० ॥ १० ॥ नवग्रहेभ्यःसांगेभ्यइत्यादिनाग्र-

हेभ्योबलिंदत्वाक्षेत्रपालायदद्यात् ॥ क्षेत्रस्यपतिना० सर्व भूताधिपायक्षेत्राधिपतयेशाकिनीडाकिनीभूतप्रेतपिशाचादिप- रिवारसहितायइमंबलिंसमर्पयामि ॥ भोक्षेत्रपालअमुंबलिं- भक्षदिशोरक्षममयजमानस्यवाआयुःकर्तेत्यादि० ॥ बलिं गृह्णं- त्विमेदेवाआदित्यावसवस्तथा ॥ मरुतश्चाश्विनौरुद्राः सुप- र्णाः पन्नगाः खगाः ॥ असुरायातुधानाश्चपिशाचोरगरा- क्षसाः ॥ डाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः ॥ जृंभकाः सिद्धगंधर्वानागाविद्याधरानगाः ॥ दिक्पाला- लोकपालाश्चयेचविघ्नविनायकाः ॥ जगतांशांतिकर्तारोब्रह्माद्या-

श्च महर्षयः ॥ माविघ्नंमाचमेपापंमासंतुपरिपंथिनः ॥ सौम्या भवंतुतृप्ताश्चभूतप्रेताःसुखावहाः ॥ इतिमंत्रान्पठेत् ॥ अयं बलिः शूद्रेणदुर्ब्राह्मणेनवानेयः ॥ ततोहस्तौपादौप्रक्षाल्याचम्य पूर्णाहुतिंजुहुयात् ॥ स्रुचिस्रुवेणद्वादशवारमाज्यं गृहीत्वानारिकेलादिचगृहीत्वा ॥ समुद्रादूर्मिं० ३ मूर्धानं० १ पुनस्त्वा० पूर्णादर्वि० सप्ततेअग्ने० धामंतेविश्वं० मूलमंत्रः नमोदेव्यैइत्यादिमंत्राश्च ॥ ततोवसोर्धारांहुत्वाप्रणीताविमोकादिकर्मशेषंसमाप्य ॥ मूलमंत्रेणहोमदशांशेनदुग्धेन जलेनवातर्पणंकृत्वातेनैवमंत्रेणतद्दशांशेनमार्जयेत् ॥ ततोय-

जमानआचार्यादीन्वस्त्राद्यैःसंपूज्य तेभ्योगोमिथुनानिहिरण्यं चदद्यात् ॥ तत आचार्यादिभ्योन्येभ्योवाकपिलागोनीलमणि-श्वेताश्वछत्रचामरभूमिशय्यासप्तधान्यानियथासंभवंवादद्यात् ॥ ततआचार्यादयःकलशोदकेनसपत्नीकंसकुटुंबंयजमानं समुद्र-ज्येष्ठाइत्यादिभिःसुरास्त्वेत्यादिभिर्ग्रहमंत्रैश्चाभिषिंचेयुः ॥ ततो-यजमानोग्रहाणामुत्तरपूजांकृत्वाचार्येण विसर्जनेकृतेग्रहपीठदा-नंकृत्वादेवींपंचोपचारैःसंपूज्यमहाबलिंदद्यात् ॥ तत्रक्षत्रि-यादिनाश्वमेषच्छागमहिषाणामन्यतरोदेयः ॥ विप्रेणतुकू-ष्मांडबिल्वमिक्षवश्चदेयाः ॥ सचेत्थं ॥ देवींद्रोणपुष्प-

बिल्वाम्रदलजातीचंपकैःसंपूज्यकर्ता उदङ्मुखः पूर्वमुखंदेवीमुखंवाबलिंगंधादिनाभ्यर्च्य ॥ पशुस्त्वंबलिरूपेणममभाग्यादुपस्थितः ॥ प्रणमामिततःसर्वरूपिणंबलिरूपिणं ॥ चंडिकाप्रीतिदानेनदातुरापद्विनाशनं ॥ चामुंडाबलिरूपायबलेतुभ्यंनमोस्तुते ॥ यज्ञार्थेबलयःसृष्टाःस्वयमेवस्वयंभुवा ॥ अतस्त्वांघातयाम्यद्यतस्माद्यज्ञेवधोऽवधः ॥ इतिबलिमभिमंत्र्य ऐं ह्रीं श्रीं इतिमंत्रपुष्पंक्षिप्त्वा ॥ रसनात्वंचंडिकायाः सुरलोकप्रसाधकः ॥ ह्रांह्रींखड्गआंहुंफट् इतिखड्गमन्यद्वाशस्त्रंसंपूज्य ॥ ॐ कालिकालियज्ञेश्वरिलोहदंडायैनमः ॥ इतिब-

लिंछेदयित्वा ॐ ह्रीं ऐं ह्रीं कौशिकि रुधिरेणाप्यायतां इतिदेव्यैनिवेद्य ततो माषपिष्टमयंशत्रुंकृत्वा खड्गेनछेदयित्वा स्कंदायविशिखायचदत्वाबलिशेषंरक्षोभ्योहरेत् ॥ मंत्रस्तु ॐ ह्रीं स्फुरस्फुर कुंभ २ सुनु २ गुलु २ धुनु २ मारय २ विद्रावय २ विदारय २ कंपय २ कंपातय २ पूरय २ ॐ ह्रीं ॐ हुं फट्‌ २ हुं मर्दय २ हुं ॥ ततःशेषंबहिर्दद्यात् ॥ तत्रमंत्राः ॥ बलिंगृह्णंत्विमंदेवाइत्यादयःपूर्वोक्ताएव ॥ ततः स्नात्वातिलकंधृत्वादेवींप्रार्थयेत् ॥ तत्रमंत्राः ॥ खड्गिनीशूलिनीघोरा० १ शूलेनपाहिनोदेवि० ४ नमोदेव्यै महादेव्यै०

६ रूपंदेहियशोदेहिभगंभगवतिदेहिमे ॥ पुत्रान्देहिधनंदेहि सर्वान्कामांश्चदेहिमे ॥ महिषघ्निमहामायेचामुंडेमुंडमालिनि । आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते ॥ इतिदेवींसंप्रार्थ्य गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं ॥ सिद्धिर्भवतुमेदेविप्रसादात्त्वसुंदरि ॥ इतिदेव्यैजपंनिवेद्य ॥ कृतस्यकर्मणः सांगतासिद्ध्यर्थं कुमारीब्राह्मणसुवासिनीः पूजापूर्वकंसंभोज्य संकल्प्यवा न्यूनातिरिक्तदोषपरिहारार्थं ब्राह्मणेभ्योभूयसीं दक्षिणांदत्वाग्निंसंपूज्य विभूतिंधृत्वा गच्छगच्छेत्यग्निंविसृज्य मूलमंत्रेणपुष्पेणदेवीमुद्वास्यतेनैवषडंगंकृत्वा उत्तिष्ठब्रह्मण०

अभ्यार० ॥ उत्तिष्ठदेविचंडेशिशुभांपूजांप्रगृह्यच ॥ कुरुष्वमम कल्याणमष्टाभिःशक्तिभिःसह ॥ इतिमंत्रैर्विसृज्याचार्याय दत्वा-मंत्रंपठेत् ॥ त्रैलोक्यमातर्देवित्वंसर्वभूतदयान्विते ॥ दानेनाने-नसंतुष्टासुप्रीतावरदाभव ॥ ततःयस्यस्मृत्या० ॥ प्रमादात्कुर्व-तांकर्म० इत्यादिजपित्वाकर्मेश्वरार्पणंकृत्वासुहृद्युतो भुंजीत ॥ इदमेवपूजाहोमबल्यादिविधानंनवरात्रेपिज्ञेयं ॥ तत्रविशेषस्तु-दशम्यांप्रातर्देवीविसर्जनं ॥ अन्यच्चमहानिबंधेभ्योवगंतव्यं ॥ इतिसंक्षेपेणनवचंडीशतचंडीसहस्रचंडीप्रयोगः ॥ ॥ ॥

हें पुस्तक मुंबईत 'निर्णयसागर' छापखान्यांत पांडुरंग जावजी यांनीं छापून प्रसिद्ध केलें.

शके १८५५, सन १९३४.

आवृत्ति ११ वी.

पब्लिशर:—पांडुरंग जावजी.
प्रिन्टर:—रामचंद्र येसु शेडगे.

नं० २६।२८ कोलभाट लेन,
निर्णयसागर प्रेस, मुंबई.

॥ इति सप्तशती समाप्ता ॥